आदित्याया। पंचमे चंद्रमसे स्वाहा। षष्ठे ऋतवे स्वाहा। सप्तमे मरुद्भ्यः। अष्ट
मे बृहस्पतये। ऽदं नवमे मित्राय। दशमे वरुणाय। एकादशे इंद्राय। द्वादशे
विश्वेभ्यो देवेभ्यः स्वाहा। चतुर्मासोपक्रादावेतासामेवाहुतीनां पुनः पुनरा
वृत्त्या होमः कार्यः॥ इति महावीरभेदे प्रायश्चित्तं॥ ॥अथ धर्मदुघायां मर
णेऽदोहे च प्रायश्चित्तमुच्यते॥ ॥तत्र धर्मदुघायां मृतायां तस्या एवाऽदोहे

गो॰ ३

॥७३॥ चधर्मदुघाया दोहस्थानेऽन्यांगांउ दक्षुरवीं स्थापयेत्॥ अथ वाऽशक्त्या
याः पुरस्तात्स्रा भुरवीमन्यां स्थापयेत्॥ ततोऽध्वर्युराज्यसंस्कारं करोति॥
पूर्वं ब्रह्मा आवीं हवनीये स्वाहेति कालाहुतिं हुत्वा यजमानं स्येति वाचयति। ततो
ऽध्वर्युर्जुह्वां सरूक्षहीनमाज्यं गृहीत्वा गृहीत्वा धर्मदुघायाः स्थाने स्थापिता
याः ऽन्यस्या गोः पुच्छाद्दक्षिणविभागस्थे उच्चैः अस्थुनि होमाधिकारणे भू
तेपरमेष्ठिने स्वाहेति चतुर्गृहीतमाज्यं जुहोति॥ अत्र चोपविष्टस्य
होमासंभवात्सामर्थ्यात्तिष्ठता होतव्यं॥ ततस्तामन्यां गां यर्मावसेचनतथा
दोहयत्॥ पशुवरुणप्रघासादौ दोषदाज्यस्कंदने भुवपतये स्वाहेत्यादिभिर्म
न्त्रैः॥ चतुर्गृहीत्वा होमो विकल्पेन॥ अपाविष्टाजनयन्निति नित्यं सरूक्षहीनं
न होमः॥ सोमे चेत्सर्वमेकालाहुतिवाचने भवतः॥ ततोऽभिमर्शनादि स्थालीभे
दे तु भूमिर्भूमिमित्यभिमर्शनमपि भवति॥ सोमयागमध्ये यस्मिन्कस्मि
श्चित्कर्मणि सोमांगे सोमांगे गोवा विहितादन्यथाभावे जाते परमेष्ठ्यादिच
तुर्गृहीतादाहुतीनां मध्ये यथाकालं एकैकाहुतिं सरूक्षहीनेनाज्येन हुत्वा यजे

॥७३॥

स्य दोहदस्य मुमंत्रं यजमानं वाचयति॥ तां ब्रह्मणे वयाजुहुयादिति श्रुतेरेता
ब्रह्मणा होतव्याः॥ वाचनमपि ब्रह्मणा कार्यं हुत्वा वाचयतीति कात्रसयसाम
र्थ्यादिति वासुदेवः॥ अपरे तु वाचनमध्वर्युकर्तृकमिच्छंति अत्राह वासुदेवः॥
सोमांगोपपात एव कालाहुतिर्भवति नेष्टिपश्वाद्यंगोपपाते इति॥ प्रयाजोदिन
सोमांगन त्वनेनवद्दूषणं॥ सोमस्य ते नतत्रस्यादनादिष्टपुरोदितमिति॥ अ
त्र एकैककालाहुतिहोमे ब्रह्मणः कर्तृत्वं॥ संमुदितेन चतुर्गृहीताद्धोमेत्वध्वर्युरेव॥
सर्वत्र पूर्वं कालाहुतिहोमो वाचनं॥ ततोऽनेनादिप्रायश्चित्तं अनादेशो प्रायश्चित्तां
तरस्यादेशो नुकालाहुतनंतरमादिष्टप्रायश्चित्तं भवति प्राक्कर्मादिति हरिः
स्वामिनः संप्रदाय पद्धतावप्येवमस्ति॥ सोमेज्यापपाते एकैकाहुतिर्यथाका
लमाध्वर्यवचेति क्रमेणोपदेशः॥ गदाधरकारिकाराद्यस्तु औदिष्टाः नादि
ष्टप्रायश्चित्तसमनंतरे कालाहुतिहोममिच्छंति॥ तत्र प्रथमं कालाहुतिहोमो
यज्यते॥ पाठक्रमानुरोधात्॥ तोवाए ताश्चतुर्गृहीताद्याहुतयो भवति प्रायश्चि
त्तयो नामेस्तुपक्रम्य॥ अथ यद्यत्तस्य कृन्नेतत्समन्वीक्ष्य जुहुयादित्यत्र ग्रहकां

॥२७४॥

ऽकालाहुतीनां विधानं॥ मध्यमकांडे तु पूर्वं विहितानामेवा ऽवसरमात्र
विधानार्थमनुवादः। सोमापहरणादिप्रायश्चित्तानां चातः परमस्मि
न्नेव कांडे विधानं। वेदाहुतीनां चाष्टाध्यायविधानं। अन्यासां धर्मभेदा
दिप्रायश्चित्तीनां तु ततो प्यूर्ध्वमारण्यके। अन्यत्राप्यध्वरस्य पूर्वमयाग्ने
रिति। तस्मात्सर्वत्र पूर्वं कालाहुतिहोमः। ततो नादिष्टप्रायश्चित्तानामनुष्ठा
नमित्युक्तरूपं॥ कालाहुतयस्तु दीक्षाः स्रुपसः सुत्यापरस्ताः। ऋत्विजः प्र
बोधयेयुस्तस्मात्ता आहवनीये होतव्याः॥ ऋत्विक्प्रबोधनादारभ्य सुत्याया
माग्नीध्रीये। यदि दीक्षोपरमचाहवनीये यदि प्रस्तुत आग्नीध्र इति श्रुतेः।
आहवनीयप्रणयनानंतरमग्नीषोमीया ऽहन्यन्तरं वेदो। भुवइति होम
स्त्वाग्नीध्रीयप्रणयनानंतरमाग्नीध्रीये। ततः प्राग्दक्षिणाग्नावेव। सर्वप्रा
यश्चित्तहोमस्तु सर्वदा आहवनीय एव। चतुस्त्रिंशजोमापि पृषदाज्यस्कं
दनादिभेदेनादौ विहित आहवनीय एव भवति॥ ॥अथ कालाहुतीनां
कालभागो लिख्यते। अत्र परादिना पूर्वंत इतिवत्सर्वापि दिष्टकालादार

॥२७४॥

भ्योत्तरकालास्ताः कूर्वं कालाहुतेः कालइतिसर्वेषां भाष्यकर्तॄणामभिम
तं। तत्र अहं अस्मिन्वसंते सोमेयागं करिष्य इति मनुसाचिंतितेत्य यदि देवा
नमनुषाह्वोकारणाद्वसंते सोमयागो नवृत्तस्तदा परमेष्ठिने स्वाहेति सव
कृहीते न जुह्वा कालाहुतिं दत्वा यत्तस्य दोहइति वाच्ययेत्। ततो भुवइत्य
नादिष्टहोमं कुर्यात्। वाचा सोमं करिष्यामीत्युक्ते च नदकरणे प्रजापत
ये स्वाहेति॥ सोमाहरणार्थं गत्वा सोममनादायागमने अंधसे स्वाहेति।
एतास्तिस्रस्तत आहुतयस्तदर्थमाहवनीयमुद्धृत्य तत्राप्येवं जुहुयादिति
नियमादावत्तावत् षड्भाराश्चितिस्रुत्रा चेत्रासोणवत्ताज्य ऽसंस्कृत्याहव
नीये सकृद्गृहीतेनाज्येन परिस्तरणसमिदाधानपूर्वकं ब्रह्मणा होतव्याः॥
ततो वाचनमनादिष्टहोमश्च यथादेवतं त्यागः॥ सातत्राख्यायां निहिते
सोमे दीक्षितो यमितिउ हादनप्रेषात्सर्वकृ विहितान्यथाभावे सवित्रे स्वा
हेति। उहादनप्रेषादूर्ध्वं त्वाला हाराण्यु विधायेस्येतस्मात्प्राक् विश्वकर्म
णे स्वाहेति। हारापिधानादारभ्य सोमोपनहनोहरणात्प्राक्पूषणे स्वा

॥७५॥ हेति। सोमोपनहनमेषादारभ्य प्राक् विक्रयिणे समर्पणाद्दिन्द्राय च म
रुद्भ्यश्च स्वाहेति। विक्रयिणे समर्पणादारभ्य हिरण्यवाचनात्प्राक्
असुराय स्वाहेति। हिरण्यवाचनादूर्ध्वमुरो सोमनिधानात्प्राक् मित्रा
य स्वाहेति। उरो निधानादारभ्य क्रीतानुवाचनात्प्राक् विष्णवे शिपि
विष्टाय स्वाहेति। क्रीतानुवाचनादूर्ध्वं प्रागुपस्तम्भनाद्विष्णवे नरंधि
षाय स्वाहा। शकटोपस्तम्भनादूर्ध्वमासंद्यामासादनात्प्राक् सोमाय स्वा
हेति। असंद्यामासादनादूर्ध्वमाग्नीध्रीयेऽग्नेनिधानात्प्राक् सर्वास्व
पेसत्सु वरुणाय स्वाहेति। अग्निध्रीयनिधानादूर्ध्वं हविर्धाने सोम
निधानात्प्राक् अग्नये स्वाहेति। हविर्धाने सोमनिधानादूर्ध्वं प्राक् सो
मं चासंधामित्युस्मान्निन्द्राय स्वाहेति। अग्नीध्रे आसंद्यां सोमविधा
नादारभ्य प्राक् सोमोपावहरणादग्नये स्वाहेति। आसंदीस्थिते सो

॥७५॥

मे वरुणाय स्वाहेति। चेति द्वयोः समुच्चय आग्नीध्रीयगतत्वस्य चासंदी
स्थितत्वस्य च निमित्तद्वयस्य विद्यमानत्वात्। उपावहरणादारभ्य सो
माभिषवात्प्राक् अथर्वणे स्वाहेति। उपांशुसवने सोमाभिषवादूर्ध्वं प्राङ्ग्रा
भेरिति ग्रहग्रहात् विश्वेभ्यो देवेभ्यः स्वाहेति अभिषवे क्रियमाणे विष्ण
वे इति। एवमभिषवावर्तान्वा सामर्थ्येनेवमेवावृत्तिः। अभिषवादूर्ध्व
मन्तर्यामग्रहात् सर्वं वायवे स्वाहेति। अन्तर्यामग्रहादूर्ध्वं प्राक् मैत्रा
वरुणग्रहणात् शुक्राय स्वाहेति। मैत्रावरुणग्रहणादूर्ध्वं प्राङ्मंथि
नोग्रहणात् शुक्राय इति। मंथिनोग्रहणादूर्ध्वमुन्नीयमानानुवाचना
त्प्राक् मंथिने स्वाहेति। जुहुयादिति प्रायश्चित्तकारिकाकारः। सत्रु
श्रयणमात्रे द्वयमाहुतिरिति गदाधरः। तत्र च यथासंभवं सोम
स्य पूतत्वावस्थायां शुक्राय इति। पूतभृत्कदोद्दूयमानत्वे वायवे इति
ततऊर्ध्वं प्रागुन्नीयमाना प्रेषात्सूतत्वे नक्षुक्राय इति।। चमसोन्नय
नादारभ्य प्रानः प्रातःसवस्य ति प्रेषात् प्राग्विश्वेभ्यो देवेभ्य इति।।

॥७६॥ ततःआरभ्यचमसमाध्वर्युभिश्चमसहोमात्प्राक् अन्नसवेस्वाहेति। चम
साध्वर्युर्होमाधाग्नीध्रचमसहोमांतरुद्रायस्वाहेति। अस्योचोदक
स्पर्शनं। ततोवाचनं। सदसि भक्षायोन्नीयमानेषु चमसेषु वातायस्वा
हेति॥ ॥अत्राऽप्ययद्विचमसेषून्नीत इति प्राप्तस्यापयद्द्विहोमायोद्य
तोहूयमानोभ्याचत्तद्रि[illegible]स्यादिश्रवणाच्चमनोन्नीतस्यसोमस्योद्यतत्तो
द्यवेस्पणायामेतत्प्रायश्चित्तंभवतीतिप्रतीयते। तेनगृहादिष्वभ्यद्यम
नहूयमानादौनभवति। अथाग्नीध्रीयस्मिन्नवसरेप्राक्चमसभक्षा
च्चचेक्षसेस्वाहेति। चमसभक्षणादारभ्यप्राग्धविर्द्धनमध्येसाद
नाद्भक्षायस्वाहेति। द्विदेवभक्षणादारभ्येतिकारिकाकारगदाधरो॥
तत्कथमप्युपपद्यत इति तावेवविदंतु॥ हविर्द्धानमध्येचम
संनिधानादारभ्यो   विग्रहार्थंचमसोन्नयनात्प्राक्पितृ
भ्योनाराशंसेभ्यःस्वाहेति। अपसव्येनपितृतीर्थेनहोमादूर्ध्व
॥७६॥

मुदकोपस्पर्शनंच। तच्चापिभक्षार्थंनीयमानभक्षणादौप्रागुक्ताः।
कालाहुतयोभवंत्येव। उक्थ्यविहरणेष्वपिचमसेषून्नीतत्तहोमायो
द्यतत्वादिभक्ष्यमाणानानिसंतीति। तेषुपूर्वोक्ताःकालाहुतियोभवंत्ये
व। एवंमाध्याह्निदिनार्थमुपावहरणादौआहृतमादाययावभृथंगच्छ
तीत्येतस्मात्प्राक्पुनःपुनःप्रागुक्तनिमित्तोपवृत्तौप्रागुक्ताःकाला
हुतयोविज्ञार्थविचार्यहोतव्याः। अनेकनिमित्तसंभवेचकालाहु
तीनांसमुच्चयः। उरूणूहीतिवाचनादारभ्यसामगानांतंसिंधवे
स्वाहेति। गमनादारभ्येष्यंतेसमुद्रायेति। भक्षात्प्राक्हवनादि
बहिर्दीपनांतंसलिलायेति। कारिकायां। कुंभप्लावनादियावे
स्याद्बहिर्दीपनांतकं। अत्रांतरेविलिष्येसलिलायेतिकृय
तेऽम्भरेति। एताश्चतुस्त्रिंशत्परमेष्ठ्याद्याआहुतयः। सहस्रेही

॥७७॥

तेन ब्रह्मणा होतव्या। तदुत्तरं वाचनं च। एकैकां यथाकालं हुत्वा यज्ञस्य दो
हइति वाचयतीत्येकैकहोमे वाचनोपदेशाच्चतुस्त्रिंशद्धोमे वाचनं न
भवति। पक्षे सोमे च यदि काको यूपमारोहति तदः आपस्वरण्यव
दिति मंत्रेण ज्ञाता स्रुवगृहीतमाज्यमाहवनीये जुहोति। इदं सोमा
य। पक्षे तु ब्रह्मा जुहोतीति वासुदेवः। अत्रापि सोमे पूर्वकालाहुतिवा
चने भवतः। उक्तान्तिकस्य होमस्यात्रोपदेशात्। नादिष्टानिवस्यर्थः। ने
न पशौ शोतूपवेशनपलायनादौ होतृकर्तृकप्रायश्चित्तस्यानुक्तत्वादना
दिष्टहोमो भवत्येवेति याज्ञिकाः। एषदाज्यस्कंदने सोमे पूर्वकालाहुति
वाचने। भुवपतय इत्यभिमर्शनं। चतुस्त्रिंशद्धोमो वा। अयाविष्टाजनय
न्निति अनेन मंत्रेणाध्वर्युराहवनीये स्रुवगृहीतं जुहोति। स्थालीभेदे
भूमिरित्यभिमर्शनं च। सोमादन्यत्रापि पशुवरुणप्रघासादौ पृषदा
ज्यस्कंदने एतदेव प्रायश्चित्तं कालाहुतिवर्ज्यं॥ ॥यदि धर्मधुग्गौर्व्या

॥७७॥

घ्रेण मारिता॥ तदा कालाहुतिवाचने स्रुत्वा स्रुवगृहीतं गृहीत्वा गृहीत्वास्म
तासंज्ञाः षडाज्याहुतीरध्वर्युर्जुहुयात्। चंद्रं ते मनस्पृणोमि स्वाहेति प्र
थमं। सूर्यं ते चक्षुस्पृणोमि स्वाहेति द्वितीयां। वातं ते प्राणास्पृणोमि
स्वाहा। ३ दिग्भ्यस्ते श्रोत्रं स्पृणोमि स्वाहा। अद्भ्यस्ते लोहितं स्पृणोमि
स्वाहा। पृथिव्यै ते शरीरं स्पृणोमि स्वाहा। ६ ततोध्वर्युरन्यामानत इती
मं प्रैषं ब्रूयात्। स्वयं होमी यजमानः स्वयं होमाकरणाच्छक्तोध्वर्युणा
अन्येन वा होमे क्रियमाणे स्वयमग्नीनां समीपे गत्वोपविशेत्। समीपेपि
गमनाशक्तो रवद्वान्तो तीर्थभूमावुपविशेत्। स्वद्वा समीप एव॥ ६॥ ष
ष्टिकंडिका समाप्ता॥ ॥सायमग्निहोत्रहोमानंतरं यदि यजमानो दु
र्बलः क्षीणो भवेत्। प्रातराहुतिकाल पर्यंतं न जीविष्यतीति संभावना
यदि स्यात्। तदानीं कालमेव प्रातरग्निहोत्रं होतव्यं। यदि सायं होमा

रंभकाल एव यत्र यजमानस्य मरणशंका स्यात्। तदा एकतंत्रेण होमद्वयं
कुर्यादिति वासुदेवः॥ अकाले कृतमपि पुनः स्वकाले न कर्तव्यमेव॥ एवं
पौर्णमासेष्ट्यानंतरं प्राग्दर्शाद्यदा यजमानस्य मरणशंका स्यात्। तदा त
द्दिने वामावास्येष्टिं कुर्यात्॥ तत्र पौर्णमासेष्ट्यनंतरं यस्मिन् दिने अमावास्ये
ष्टिं क्रियते तद्दिनादारभ्य दर्शेष्टेः प्राग्यावतः सायंप्रातर्होमास्तंत्रेण जु
हुयात्॥ ततः पिंडपितृयज्ञवर्जितामामावास्येष्टिं कुर्यात्। पिंडपितृय
ज्ञस्य दर्शाऽनंगत्वात्। एवं वैश्वदेवपर्वणि कृते यजमानस्य मरणशंका
यां वरुणप्रघाससाकमेधशुनासीरीयाणामेव समापनं कुर्यात्। पूर्व
पक्षे शंकायां मरणशंकायां प्रातराहुतिमेव॥ तथा चानुपदसूत्रं। तच्चेद
परपक्षे प्रयाणशंके तथावत्योऽपरपक्षस्याभिविष्टास्तावत्यः स्युस्ता
सां सायंप्रातराहुतीः प्रतिसंख्याय जुहुयाद्यस्याह स्यामावास्येन हविषेष्ट्वा
समापये पुनरेव यद्यविज्ञोमरति। पूर्वपक्षे चेद्दात्रौ प्रातराहुतिरेवेति॥

तथा च कात्यायनसूत्रं॥ पौर्णमासे कृतेऽयाणे मुमूर्षुर्यदि याज्ञिकः॥ दर्शया
गस्तदैव स्यादपकृष्याहुतीः पृथक्॥ सायंप्रातश्च याः प्रोक्ता दर्शाभ्यंतर
एव चेति॥ तथा च त्रिकांडमंडनः॥ पूर्वपक्षे तु शंका चेत्स्पष्टतिशंकाग्नि
होत्रिणः॥ सायं हुत्वा तदैवाथ जुहुयात्प्रातराहुतिं॥ यदि त्वपरपक्षस्या
ऽऽपतिशंकाग्निहोत्रिणः॥ हुतावशिष्टाः पक्षेऽस्मिन् जुहुयात्सकलाहु
तीः॥ दर्शेष्टिं च तदा कुर्याद्विष्टिर्यदि न संभवेत्॥ देवतानां प्रधाना
नामेकस्य पृथक् पृथक्॥ पुरोनुवाक्यायाज्याभ्यां चतुरात्तास्ततो हु
तीः॥ जुहुयादेवमन्यत्र सर्वत्राऽप्यदिह्यते॥ थोष्टेः पन मध्ये स्या
त्स्य मरणसंशयः॥ अवशिष्टेष्टिदेवेभ्यस्तत्संख्यानिध्रुतानि च॥
तं चतुर्गृहीतान्येकत्र गृहीत्वा च मसे सह॥ पुरोनुवाक्यायाज्याभिः पृ
थक् जुहुयात्पृथक्॥ चातुर्मास्यस्य समापनेऽपि विशेषमाह स एव॥ चा
तुर्मास्यांतराले चेत्स्वामिनोऽस्तिशंकनं॥ तत्रासपर्वपर्यंतं अग्निहो

अप्यदोषस्ततः॥ तदेव कुरुते दर्शपौर्णमासान्व नपि॥ चातुर्मास्याव
त्रिष्टानि पर्वाण्येव समापयेत्॥ यस्यारूढा मे पुरोडाशं निर्वपेत्सश्च देव
तं॥ आमिक्षामथ वा कुर्यात्पूर्णाहुतिमथापि वा॥ आहिताग्निः कदाचि
त्तु कृष्णपक्षे मृतो यदि॥ तदा होमाहुतीः सर्वा जुहोती याज्ञवल्क्यनः॥
अन्ये तदेव दर्शेष्टिं कुर्युः कृष्णे मृतस्य तु॥ शुक्लपक्षे निर्वृते तस्येष्
तिः प्रातराहुतिः॥ तथोच्चय आहिताग्निर्धर्मः स्यात्स औपासनिकस्य तु
अशक्त्या पत्नीयजमानकर्तृककर्मलोपेन दोषः॥ तथा च मदनः॥ अ
शक्त्या याजमानं च सपत्नीकर्म च लुप्यते॥ ततो वताक्रतुभ्रेषुः स्यादाथ
र्वणसूत्र इति॥ ॥अथ पदार्थक्रमो लिख्यते॥ शुक्लपक्षे सायंहोमान
न्तरं यजमानस्य मरणशंकायां तदेव प्रातर्होमः कार्यः॥ अत्र होमद्र
व्याहरणानन्तरं प्रागुक्तत्वात्॥ यजमानमरणे होम्यस्य गार्हपत्ये प्रक्षि
प्य दाहः॥ ततः परमाहवनीये एवं कृते यदा प्रातर्होमकालपर्यंतं जीवे

त्तितदा पुनः स्वकाले प्रातराहुतिर्न भवत्येव॥ कृष्णपक्षे रात्रौ मृतिशंकायां च
प्रातराहुतिं पृथक्कृत्वा॥ तद्दिनादारभ्यामावास्येष्टिपर्यंतानां सायं
प्रातर्होमानां तंत्रेणानुष्ठानं कुर्यात्॥ ततः पिंडपितृयज्ञवर्जितामभा
वास्येष्टिं कुर्यात्॥ सकलसंभवे आज्यसंस्कृतस्य पुरोनुवाक्यायाज्या
भ्यां स्वस्वहविषां तदसंभवे च केवलेनाज्येन चतुर्गृहीतेन प्रधानदेव
तानां यागमात्रं कुर्यात्॥ तस्याप्यसंभवे प्रतिदेवतं पूर्णाहुतिं जुहुयाद
ग्नये स्वाहाग्नीषोमाभ्यां स्वाहेन्द्राय स्वाहेति असन्नयतस्तु अग्न
ये विष्णवे इन्द्राग्निभ्यामिति॥ एवमेव पश्वादि कर्म सकलं कर्तव्यं॥ चरु
होमासंभवे प्रधानदेवतानामाज्याहुतिमात्रं वा॥ एवं कृते यद्यमा
वास्यापर्यंतं जीवति तदामावास्यायां केवलं दक्षिणाग्निमुद्धृत्याग्न्य
न्वाधानं विना पिंडपितृयज्ञः केवलः कार्यः॥ न त्वस्यास्तानं॥ नामावास्ये
ष्टिः कृतत्वात्॥ सकलेष्टौ क्रियमाणायां हविर्ग्रहणोनंतरं प्रागासाद

नान्तमरणे हविषां गार्हपत्ये दाहः ॥ आसादनादूर्ध्वं मरणे आहवनीये दाहः ॥ अत्राश्वलायनशास्त्रेण विशेषः ॥ तदाहुर्य आहिताग्निरुपवसथे म्रियेत कथमस्य यज्ञः स्यादिति नेनयाजयेयुरित्याहुरनभिप्राप्तो हि यज्ञो भवतीति तदाहुर्य आहिताग्निरधिश्रितेऽग्निहोत्रे सान्नाय्ये वा हविःषु वा म्रियेत का तत्र प्रायश्चित्तिरन्वेवैतान्यनुपर्यादध्याद्यथा सर्वाणि संदह्येरं स्यात्तत्र प्रायश्चित्तिः ॥ तदाहुर्य आहिताग्निरासन्नेषु हविःषु म्रियेत का तत्र प्रायश्चित्तिरिति याभ्य एव देवताभ्यो हवींषि गृहीतानि भवन्ति ताभ्यः स्वाहेत्येवैनान्याहवनीये सर्वाहुतिं जुहुयादिति ॥ केचित्तु पक्षे मृतस्यापि अमावास्येष्टिमेव कुर्वन्ति न तु सर्वं तं पक्षहोमं ॥ एवं चातुर्मास्यादीनामन्वारब्धानां समापनं ॥ कार्यं तत्र वैश्वदेवपर्वणि कृतेऽन्यपर्वपर्यन्तं समासविधानेन यथाकालं पक्षहोमं कृत्वा पक्षान्तेऽष्टिं कृत्वा पुनः पक्षहोमं पक्षान्तेऽष्टिं पुन

रप्येवं पुनरप्येवं कृत्वा वरुणप्रघासाख्यपर्व कार्यं ॥ ततः पक्षहोमपक्षान्तेऽष्टीः कृत्वा साकमेधान् कृत्वा तत्कालमेव शुनासीरीयं कुर्यात् ॥ तस्योत्सर्गपक्षे तदानीमेव विहितत्वात् ॥ अत्रापि पक्षहोमेष्ट्याद्यसंभवे वरुणप्रघासादिकतन्त्रेण कुर्यात् ॥ तस्याप्यसंभवे यथासंभवं निष्पादितैर्हविर्भिः प्रधानयागमात्रं कुर्यात् ॥ तस्याप्यसंभवे चतुर्गृहीतैराज्यैः पुरोनुवाक्यायाज्याभ्यां सर्वान् प्रधानयागान् कुर्यात् ॥ तदसंभवे पूर्णाहुतिं जुहुयात् ॥ प्रतिदेवतममुष्मै स्वाहेति मंत्रेण ॥ एवमेव पशुसोमयागादारब्धेऽन्तरा मरणशंकायां यथासंभवं समापनं कर्तव्यं ॥ मरणात्प्राक् असमाप्तौ मरणान्तमेव कर्म भवति ॥ कर्तुरभावात् ॥ दुर्लभावस्थायां कृतस्नानं शुद्धवस्त्रमुक्तं भूमौ बर्हिरास्तीर्य प्राक्शिरसं दक्षिणाशिरसं वा निवेशयेत् ॥ पुत्रादिरारण्यकपुरुषसूक्तादि श्रावयेत् ॥ वैतरण्यादिदानाम् मरणानन्तरं तस्य प्लावनं ॥ पूर्ववस्त्रं त्यक्त्वा वस्त्रान्तरं परिधा

नं। चंदनपुष्पादिभिरलंकरणं॥ अतऊर्ध्वं सर्वमपसव्येन दक्षिणाभि
मुखेन कार्यं॥ सद्यस्सदग्र संस्कारांश्च चोदाहार्थं सितापजाग्न्यर्थं भिस्या
हवनीयदक्षिणस्योद्धरणं॥ तृणचूर्णगोमयचूर्णमुक्तानां तत्तच्चिह्नानां
त्रिसंख्यास्थालीनां गार्हपत्याहवनीयदक्षिणाग्निषु क्रमेण निखननं एवं स्थाली
रेष्टवाहृतिप्रेषपूर्वकमधिश्रयणानंतर उत्क्रांतिश्राद्धं गर्धनिष्ठापंचकमर
णे वज्रमौक्तिकवैडूर्यपुष्परागेंद्रनीलकमिति पंचरत्नं मुखे मुक्तावह्नचायामि
तिमंत्रेणाहुतित्रयं॥ ततो निर्हरणादि॥ ततो हरिद्रेण धाद्यग्न्यशांतिर्यानग्नि
मतस्य स्थाने गार्हपत्यादीन्स्थालीस्थाने निवेशि कुर्यात्॥ सभ्यावसथ्या न
पि पात्रांतरे कृत्वा तत्र स्थाप्य। पृषदाज्यधृतदर्भतिलसर्वयज्ञपात्रसम
हिरण्यशाकलेधनादि अनसिद्धत्वाद्दक्षिणं दिशं गच्छंति॥ यमसूक्तं एता
ध्यायं पठंतो गच्छंतीत्यर्थः॥ ग्रामस्य पूर्वद्वारेण ब्राह्मणस्य हरणं॥ ग्रा
मश्मशानयोरर्द्धमार्गे विश्रामश्राद्धं॥ ततः श्मशानभूमिप्राप्य शवस्य श
नैर्भूमौ स्थापनं॥ ततश्चितिस्थानश्राद्धं॥ ततः पुच्चेदेशप्लवनं॥ शवस्य

पनं। ततः समस्यश्चुचोक्षीरिण्या दृढस्य सद्यस्सद्ग्र संस्कारांश्च त्वा गार्हप
त्याहवनीयदक्षिणाग्निनाभूमौ स्वस्वस्थाने स्थापनं॥ सभ्यावसथ्ययोश्च
तीर्थोस्थान्यां दिशि पंचसु प्रक्रमेषु। उत्तरतः सप्तसु प्रक्रमेषु वा स्थापनं॥
तथाच सांख्यायनः॥ सभ्यावसथ्यावाहिताग्नेर्दहनकर्मणि न प्रयुज्यते
चितिप्रदेशात्प्रागुदीच्यां दिशि पंचप्रक्रमान्तनीयोत्सृजतीति॥ तथा पा
त्राणि तु प्रयुज्यंत इति॥ प्रक्रमोत्र पदिकः॥ ततो गार्हपत्याहवनीययोर्म
ध्ये प्रागायतां काष्ठचितिं कुर्यात्॥ मृतस्य केशश्मश्रुनखलोमानि वंत
नं। विपुरीषकरणं वा। केशादीनां भूमौ निखननं। विपुरीषपक्षे प्रक्षा
ल्यांतराज्येनांजनं॥ सुप्तसु प्राणायतनेषु मुखे दक्षिणोत्तरनासिका
चक्षुःश्रोत्रेषु यथाक्रमं मेके क हिरण्यशकलप्राशनं॥ चितौ प्राग्ग्रीव
मुत्तरलोमकृष्णाजिनमास्तीर्य तस्मिन्शाकशिरसमुत्तानं यतमानं
निदध्यात्॥ अत्र वा हिरण्यशकलप्राशनं॥ ततः करे पिंडदानं श्मशानवा
सिदेवतानां च। ततः पात्रासादनं। सर्वाणि पात्राणि प्रागग्राणि उत्तानानि

॥२२॥

निच सव्यहस्ते उपभृत तउरसि ध्रुवा दक्षिणस्या नासायां वैकंकतः स्रुवः ॥
श्रोत्रे कर्णयोः । शिरसि रिक्तः प्रणीतश्चमसः । कपालानि शिरसि वा ।
पार्श्वयोः शूर्पे उदरे पृषदाज्ययुक्ता इडा । शिश्नसमीपे शम्या । अंडसमी
पे अरणी उदगग्रे । तत्समीपे अधोमुख उलूखल मुसले च । आज्यस्थाली
पिष्टपात्री उपवेष षडवत्ता भिश्ततावदान पुरोडाशपात्री पीठ पूर्णपा
त्र कूर्च प्रमुखानि सर्वाणि यज्ञपात्राण्यूर्वोर्मध्ये पात्रत्वाविशेषात् ॥
आज्यस्थाली चमसन्नयी च दसु प्रक्षेप्योः सर्वपात्राणां ते । स्मार्तपात्रा
णाम् अरणीसहितानाम पूर्वोर्मध्ये सादनं । वारुणप्रघासिकानां च ।
मन्नयाः समयो नाम प्सु प्रक्षेपः । अपरे समयानां ब्राह्मणाय दानम
प्सु प्रक्षेपो वा । चमसः अग्निभिश्चिते रादीपनं । आज्यसंस्कृत्य परि
स्तरणसमित्पूर्वकमाहवनीये स्वरु हीनाहुति होमः । अस्मात्व
मिति मंत्रेण असावित्यत्र प्रथमैकवचनांतं मृतस्येनामग्रहणं ॥ स्त्रि

॥२२॥

याम प्यस्यां मंत्रस्य मदितस्यैव प्रयोगः ॥ सूतिकायामरणे विशेषः ॥ सूति
कायां मृतायां कुंभे उदकं । कृत्वा तत्र पंचगव्यं प्रक्षिप्यापो हिष्ठा इदमाप
इत्यादि पुण्यभिरभिमंत्र्य ब्राह्मणानुज्ञया पंचदश प्राज्ञापस्यास्त्वा
कुंभोदकेन शातत्स्त्वा तांस्नापयित्वा वस्त्रांतरेण सर्वांन्वेष्टयित्वादा
हः कार्यः ॥ उदक्यासूतिको वापि यं प्रेतस्पृशति तस्याप्येष एव विधिः ॥
रजस्वलायाम्मरणे प्येवं ॥ इदमग्नय इति भागः ॥ ततो जुहु तेन पूरयि
त्वा दक्षिणहस्ते सादयंति भागाग्रं ॥ स्रुवं सव्यनासिकायां । स्फ्यं दक्षिणे
हस्ते । चितेः परितो दक्षिणाग्रैर्बर्हिर्भिराच्छादनं ॥ ततः स्कंधे कुंभं कृत्वा ।
तेन पादतआरभ्य चितिं परितो अप्रदक्षिणं धारां दद्यात् ॥ ॥ अथा
वसथ्याग्निसंबंधि पात्राणां प्रतिपत्तिर्लिख्यते ॥ ॥ दक्षिणाग्निर सं
मृते । चितौ निधाय मुखादिषु हिरण्यशकलप्राशनं ॥ शिरसि चमस
पार्श्वयोः शूर्पे अंडयोररणी प्रेक्षणीपात्रादीनामंतरेणोरू प्रक्षेपः ॥

वैश्वदेवी त्र्योश्च मसयादीनामंभसि॥ अथ सव्यं जान्वाच्य दक्षिणतश्चि
ताया अग्निदानं। समिद्दर्भस्रुवेणास्मात्त्वमित्याहुतिहोमः॥ दक्षिण
नासिकायां स्रुक्चास्फ्यं दक्षिणहस्ते शेषमाहिताग्निवत्॥ आहिता
ग्नेरपि पूर्वस्मात् पात्रप्रतिपत्तिं कृत्वा पश्चाच्छ्रौतपात्रप्रतिपत्तिर्भ
वतीति कर्मप्रदीपे शाठ्यायनेनोक्तमस्ति। तदपि युक्ततरं॥ तथा च
कात्यायनः॥ एवमेवाहिताग्नेः स्रुवपात्रन्यासादिकं भवेत्॥ कृष्णाजि
नादिकश्चात्र विशेषः सूत्रचोदितइति॥ तथा च शाठ्यायनिः॥ पा
त्राणिषु प्रयुज्यंत इति। ततो नयेयुरस्मेत्युदकसमीपे तड़ागादौ गत्वा
समीपस्थं संयुक्तं विद्यासंयुक्तं उत्तरदानाभिज्ञं भिशात्तकेः वा उदके
यावतेउदकं करिष्याम इति मंत्रेण। अत्र तव पेस्य ते कुरुध्वं मा चैव
च पुनरिति प्रतिवचनं॥ ततउर्ध्वम् नेकुरुध्वमिति॥ ततएव वस्त्राः क
प्राचीनावीतिनः स्नानार्थमुदके प्रविशंति ततः सव्यहस्तानामिकयान्

पा॥

छीमुदकमपनोद्य योह्यपेरयित्वा अनेपः शोशुचदघमिति मंत्रेणोदक
मध्ये दक्षिणाभिमुखा निमज्जंति॥ स्नानि। ततः प्रेतमुद्दिश्यामुकगोत्रामुक
प्रेतैतत्तेउदकमित्यंजलीना दक्षिणाग्रान् कुशान् कृत्वा सतिलमुदकं स
कृत्त्रिर्वा प्रसिंचंति। ततः शाड्वलवति बालतृणमुक्तेशुचिप्रदेशेउपवि
श्य सपिंडाः संसारानित्यतां ख्यापयंतः॥ पुत्रादीनां शोकमपनुदं
ति। ततः कनिष्ठान् अग्रतः कृत्वा पश्चाद् अनलोकयंतः पंक्तिभूता ग्रा
ममध्ये आयांति। आगत्य गृहद्वारे निंबपत्राणि विदश्याचम्योदक
मग्निं गोमयं गौरसर्षपों स्तैलमालभ्य पाषाणस्योपरि पादं कृत्वा
गृहं प्रविशंति। वर्षादिना चितामने विहितारणिपात्रादिकाष्ठेना
ऽर्द्धदग्धे मंथनं। तदलाभे। अन्येन काष्ठेन दग्धं शेषे पामंथनं कृत्वा
शेषस्य दाहः कार्यः॥ अथवा शेषस्याप्सु प्रक्षेपः॥ अथवा लौकिकेग्नौ
भूर्भुवः स्वः स्वाहेति घृताहुतिं स्रुवाचोहुत्वा। तेन लौकिकाग्निना दाहः

दोषस्य। पत्नीयजमानयोर्मध्ये यस्य पूर्वं मरणं तस्य वैदिकाग्निना दाहः॥
पश्चान्मृतस्य लौकिकाग्निनेत्येकः पक्षः॥ अथवा यजमानस्य पूर्वं मरणे
गार्हपत्यस्योल्मुकं पृथक्कृत्वा नमुल्मुकं लौकिकारण्योः समारोप्यारणिस्थ
मापत्नीमरणोद्धारयेत्। अन्यानि मथ्यतेन दाह्या॥ इति द्वितीयः॥ अथ प
त्न्याः पूर्वं मरणे यदि पत्न्यः पुनर्विवाहाधारणयोः शक्तिर्न भवति। तदा गार्ह
पत्यैकदेशेन दाह्यास्मि मिथ्यं वा कनिष्ठा तत्पत्नी ज्येष्ठायां जीवत्यां गार्हपत्यै
कदेशेन वा दाह्या सर्वाग्निभिर्वा तत्र सदेहे वक्तृतां धानाद्वितीया पत्नी ज्येष्ठा
या जीवत्यामपि सर्वाग्निभिर्दाह्या॥ आधानानंतरं पश्चात्परिणीता द्वि
तीया गार्हपत्यैकोदेशेनेनेति केचिद्विवेकमाहुः॥ भार्यादिहे द्वेताग्निनो
द्भिः। जीवंत्या प्रथमायां तु पुरायानसमं हितेन दिनियत्तदोधावतेन तु प्र
विष्टा द्वितीया द्विषय भितिस्मृतिचंद्रिकायां॥ यावज्जीवं कृता पत्नी सुव
र्णपत्नीवाकृत्वा नित्येष्ट्यग्निहोत्राग्रयणानि कुर्यात्॥ पुनः परिणयन

संभवेपि विकल्पेन पत्न्याः श्रौताग्निभिर्दाहः केवलेनावसथ्येन वा पत्नीदाहः॥
तस्मिन्पक्षे आवसथ्यस्य केवलस्य पुनराधानं श्रौताग्नयस्तु त एव। आश्वला
यनब्राह्मणे। तदाहुर पत्नीकोप्यग्निमाहरेन्नाहरेदित्याहर्येदिनाहरेदन
द्धा पुरुषः कोनद्धा पुरुष इति तदेवात्र पित्र पितृमनुष्य भवतीति तस्मादपत्नी
कोप्यग्निमाहरेत्॥ तदेवा यज्ञगाथाभिर्गीयन्ते। यजेत सौत्रामण्यां पत्नीको
प्यसोमतः॥ मातापितृभ्यामनृणार्थं यजेत वचनाच्छ्रुतेरिति तस्मात्सौम्यं
याजयेत्॥ तस्मात्सपत्नीकस्याधानं कुर्वंति अपत्नीकोग्निहोत्रं जुहोति श्र
द्धा पत्नी सत्यं यजमानः श्रद्धया सत्येन च मिथुनेन स्वर्गं लोकं यजतीति।
उत्सर्गाग्नेर्जीमार्थं भिक्षताधानं कार्यं। तत्रापसव्येन दक्षिणामुखेन सर्वं
कार्यं पितृस्याचम्यासनस्थापनं॥ अग्न्यागारकरणं। स्वेर संस्कारः। गा
र्हपत्यस्य पश्चात् येस्याग्ने पद इति मंत्रेण मथित्वा गार्हपत्यस्थापनं॥ यस्या
ग्नयो जुह्वतो मांसकामाः संकल्पयंते यजमाने मांसं पिबंते हवींष्यभ्य

॥२५॥ दर्पंते॥ ते स्वर्गं लोकमिमं प्रोक्तं गमयंतु॥ इति मंथनमंत्रः॥ ननस्तूष्णीं
शास्य मुचस्याज्यं संस्कृत्य स्रुचि द्वादशगृहीतं गृहीत्वाहवनीयं तूष्णीं
हुत्वा दक्षिणाग्निमुद्धृत्य संदीपनवृत्त्यधिश्रयणादि होमं कुर्यात्॥ उत्सा
नाग्नेरणिसद्भावे एव॥ अरण्योरभावे चान्ये अरणी आनीयारण्यारूपपरि
दक्षिणं प्रेतपाणिं दत्त्वा अयं ते योनिरिति समारोपमंत्रं पुत्रादिर्जपेत्॥
ततो मंथनाग्न्याधानं कृत्वा पूर्ववद्दहेत्॥ आपस्तंबः॥ यद्याहिताग्निरुत्स
ष्टाग्निर्विधुराग्निर्धित्वाग्निर्वा प्रमीयेत तत्र नमन्यन त्रेताग्निः स्याद्दहति
तस्य प्राचीनावीत्यग्न्यायतनान्युद्धृत्यावोक्ष्य यजमानशतेनेप्रेतं निधा
य गार्हपत्यायतने अरणी संनिधाय मंथेनियस्याग्नयो हुतो मांसकामाः
संकल्पयंते यजमानस्यासंजायतां ते हविषे सादितायस्वर्गं लोकमिमं प्रे
तेनेयं त्विति तूष्णीं विहृत्य द्वादशगृहीतेन स्रुवपूरयित्वा तूष्णीं हुत्वा प्रे
तेमस्यो येत दोदिकमंत्रेति पद्यतइति॥ अथाग्नौ समरूढे यजमाने मृता

॥८५॥

ऽरण्योः प्रेतस्पर्शनं कृत्वाग्निं मथित्वा तूष्णीमाहवनीयमुद्धृत्याज्यं संस्कृ
त्य द्वादशगृहीतं तूष्णीमाहवनीये हुत्वा खाधिश्रयेण॥ अथाग्निषु नष्टे
ष्वरण्योर्नष्टयोस्तास्मिन्नेव मरणे अन्ये अरणी आनीय प्रेतहस्तयोरुपरि
निधाय समारोपमंत्रं पठित्वा मंथाधानं कृत्वा खाधिश्रयणादि कुर्या
त्॥ ॥सर्वसंतापजाग्निनाशे गार्हपत्यं मथित्वाहवनीयदक्षिणाग्नी
विहृत्य प्रायश्चित्तं कृत्वा पुनरुद्धृत्य खाधिश्रयणं कुर्यात्॥ स्थाली स्था
न्यनुगमे स्थाली स्थ एव दक्षिणाग्नौ दोने मित्तिक होमो भूमौ निधाय वा॥
एकस्य गार्हपत्यस्य नाशे नेमष्पित्वानादिष्टं हुत्वा खां पूर्ववदधिश्रयणा
दयेत्॥ आहवनीयदक्षिणाग्न्योरेकनाशे वानादिष्ट होमोऽर्थमुद्धृत्य नहु
त्वा पुनरुद्धरणमात्रं॥ न पुनेरुषा॥ मधिश्रित्य संतापेनोपशमात्तमुत्साद
येत्॥७॥ ॥ततो दाहाद्यानुष्ठाने तिथोऽस्थिसंचयनसंज्ञक [illegible] र्म
भवति॥ तत्र श्राद्धव्यतिरेकेणात्रिप्रभृतीन् युग्यान्॥ ब्राह्मणान्भोजये

त्वा पत्रस्य रंते तस्य गृहान्यस्थीनि प्रकटि निधृत्वा अंगुष्ठकनिष्ठिका
भ्यां भान्यस्थीनि गृहीत्वा गृहीत्वा पत्रपुटे वट पलाशादि पर्ण पुटे
प्रक्षिपति। शाम्याच काः कर्दमं च भस्म राशौ प्रक्षिपति। शमीशाब्देन
शाखोच्यते। तस्य शानि वा अवकाः शैवालः॥ कर्दमः कुथितामृत्तिका
यत्तकर्द्दमइति चेत्ति। केचित्तु। ततः पत्रपुटस्थान्यस्थीन्याजेनाका क
र्पूरागरुचंदनकस्तूरिकाकेसरादिसुरभिद्रव्यैर्मिश्रयेत्॥ ततआ
ग्नेयदिशूर्व्वे कोणाकपूर्वां तातस्यां कुशांस्तरणो अग्नेयाग्रमेव टत्वा
त्वाहरिद्राधारक्तंवस्त्रखंडं चशास्तीयवाकद्दत्येनेन मंत्रेण तस्मिन्हारि
द्रेवस्त्रे अस्थि निक्षिपति। एतद्वाजसनेयकविधानं॥ वाजसनेयशा
खानुसारि। अथशाखान्तरीयत्वामनेसान्तेनवाचा ब्रह्मणा भयात्रया वि
द्ययापृथिव्याम क्षितायामपाटरसेन निवपाम्यमुकसगोत्रामुकशर्मन्नित्रि
ति अनेनवामंत्रेण कर्षाम स्थिप्रक्षेपः॥ ॥पितृमेधकारिष्यानकुंभे स्थि

संचयनं करोति न कर्षुकुंभापि कुशानास्तीर्य हरिद्रं च सुखं वास्तीर्यास्थीनीत
त्रप्रक्षिपेत्पूर्ववन्मंत्रेण। तस्य कुंभस्थस्थीस्तुगुप्ते प्रदेशे निधानं। एतत्सर्व
स्त्रियात्वापिसमानं। अविशेषात्। प्रोषितस्य यजमानस्य मरणे ज्ञाते सं
निरूढ्यं च शरीरमेव तैलद्रोण्यामवधाय शटेनाहरेत्। विप्रकृष्टोदेशो यज
मानोभ्टतश्चेत्तदा निर्मथ्यनेदग्ध्वा कृष्णाजिनेस्थीन्युपनह्याहतेन वास
साप्रच्छाद्य दीर्घवंशो प्रबध्य भूमौ निधानमकुर्वतः प्रयनाप्याहरेत्। ततो
ग्रामसमीपमागत्य सीमायामेवमृतस्य शरीरं वा अस्थीनि वा स्थापयेयुः॥
नग्राममध्येग्निसमीपे आनयेयुः॥ तत्र विदेशे मरणश्रवणादनंतर
मत्तरस्यास्थावाग्निभिर्वदाहपर्यंतं प्रतिदिनं गृहे सायंप्रातर्होमः कर्त
व्यः॥ अत एवाहापस्तंबः एतां पपावृत्ताजनेप्रमीतस्याभिवान्यवत्सायाः
पयसाग्निहोत्रं जुहुयाच्छरीरस्याग्निभिः संस्पर्शनात्तत्र सर्वं तच्छीकी
र्येतेति तथा च त्रिकांडमंडनः॥ देशांतरमृतं यावद्दहे पूर्वैदिकाग्निभिः॥

क४

२श

॥२७॥

तत्पत्नीकारयेत्तावदग्निहोत्रमुपस्थितमिति आश्वलायनब्राह्मणे ॥
तदाहुर्य आहिताग्निः प्रवसन्म्रियेत कथमस्याग्निहोत्रं स्यादिति
अभिवान्यवत्सायाः पयसा जुहुयुरथाप्याहुरेवमेवैनानजस्रानू जुहुत
इन्धीरन्ना शरीराणामाहर्तोरिति । आश्वलायनसूत्रे ॥ यदि वाध्वे प्रमी
येतेष्टिरग्नये पथिकृते । तथाऽध्वे प्रमीतस्याभिवान्यवत्सायाः पय
स्याग्निहोत्रं सर्वं हुतं तूष्णीं जुहुयुराऽसमवायादिति ॥ आपस्तम्बसूत्रं
व्याख्याने चैव एतामेव पथिकृतं जने प्रमीतस्य वियुक्तस्याग्निभिस्ते
स्य मन्तद्दूनिश्क्र तेगृहे पाथिकृती पत्नी प्रेरितैर्ऋत्विग्भिः कार्या ॥ तस्यां
समाप्तायां तद्विहार एवाभिवान्यवत्सां मन्त्रचसायापरवत्से तदुष्यतो
तस्याः क्षीरेण होमः सायंप्रातर्यावदानीयशरीरमग्निभिर्हूयते तैलं
द्रोण्यामवधाय शकटेनाहरणं निर्मथ्येन वा दग्ध्वा कृष्णाजिने स्थी
न्युपनह्याहतेन वाससा प्रच्छाद्य दीर्घवंशप्रबध्यानिदधानाः प्रयता

॥२७॥

मृन्मयभाजना आहरंतीति ना निग्रामसमर्यादायां प्रतिधयाथिसूतीविहा
रमेवतत्समीपं नीत्वा सर्वकार्यमिति धूर्तस्वामि ॥ ॥ विदेशमरणं निमि
त्तेपराकद्वयमष्टौ वा कृच्छ्रान्वा न्मसकृत्मपि प्रायश्चित्तं पुत्रादिभिर्दाहस्याधि
कार प्राप्त्यर्थं पूर्वकर्तव्यं ॥ ॥ अथ मृतानाग्निहोत्रमंत्रस्येति कर्तव्यता लि
ख्यते ॥ ॥ तत्र तूष्णीमपसव्येन सर्वं कर्तव्यं ॥ दक्षिणाभिमुखेन च ॥ सव्व
त्सरं कृत्सं स्कार आहवनीयखर एव आहवनीयस्यैवोद्धरणं ॥ न दक्षिणा
ग्नेः ॥ न कूर्चस्थापनं ॥ आहवनीयस्यैव पूर्वेण आरभ्य दक्षिणसंस्थं परिस्त
रणं ॥ तत्र पूर्वापरयोर्दर्भौ दक्षिणाग्राणि दर्भेत्वणानि दक्षिणोत्तरयोः प्रा
गग्राणि । आहवनीयस्यैव पर्युक्षणं । निवान्यवत्सा वाद्गन्तिजेषं ॥
तस्या दोहनं । गोर्हपत्याद्दुष्टभस्मा दक्षिणतो निरुह्य पूर्वेणाहवनीयं
दुग्धमाहृत्य तस्मिन्दुष्टभस्मन्यधिश्रयेत् ॥ अवज्योतनासेकौ न भ
वतः ॥ भूमिसंलग्नमेव दक्षिणतो हृत्वा दक्षिणतः सव्यदुद्वासनं । त्रिः
स्कन्दवप्रतपनं पाणिना संमार्गः ॥ पुनः प्रतपनं । उन्नेष्यामीति प्रैषः ॥

॥२८॥

सकृदुन्नयनं॥ अधोमुखेन स्रुवेण स्रुचि प्रक्षेपः॥ स्रुचो दंडस्याधः प्रदे
शे समिधं धारयन् दक्षिणतो गार्हपत्यस्याहवनीयं प्रतिहरति॥ आ
हवनीयसमीपे उत्तरतो दक्षिणाभिमुख उपविश्याहवनीये तूष्णीं द
क्षिणाग्रां समिधमादाय पितृतीर्थेन न्युब्जमास्रुक्त्वा तूष्णीं सकृत्स
हृत्सर्वं स्रुक्स्थं उपयम्य आहवनीये प्रक्षिपेति॥ अनंतरमूर्ध्वं हिः प्रकंपयन्न्या
दिकमपि न भवति। समासमेतत्कर्म। एवं मृतशरीरस्यास्थ्नां वा आ
गमनपर्यंतं सायंप्रातः कर्तव्यं॥ ततः शरीरे आगते गृह्यादग्नीन्पा
त्राणि च स्वसीमायां स्थापित शरीरस्य समीपे अस्थिपयसमीपे वा
नीत्वा संतापयज्जाग्नीनुध्याद्यो क्रांतश्राद्धादि पूर्ववद्दाहं कुर्यात्॥
बुद्धिपूर्वात्महंतॄणां क्रियालोपो विधीयते॥ तेषामेव च संकुर्तुदोषश्रु
तिरुदाहृत॥ दोहयित्वा शवं तेषां भ्रद्रेरेव विधर्मकं॥ ॥औहिताग्ने
दुर्मरणे विशेषमाह॥ ॥अंगिराः॥ वैतानं प्रक्षिपेदप्सु आवसथ्यं च

॥२८॥

तुष्टये॥ पात्राणि तु दहेदग्नौ यजमाने वृथामृते॥ वृथामृते अविहितमार्गे
णमृते इत्यर्थः॥ साग्निके पापकर्मणीति चतुर्थपादस्य कश्चित्पाठः॥ ब्राह्म
णस्याहिताग्नेर्विशेषमाह॥ बुद्धिपूर्वात्महंतॄणां क्रियालोपो विधीयते॥
तेषामेव च संस्कर्तु दोषश्रुतिरुदाहृतो॥ दाहयित्वा शवं तेषां भ्रद्रेरेव वि
धर्मकं॥ पाराशरः॥ चांडालेन श्वपाकेन गोभिर्विप्रैर्हतो यदि॥ विप्रविद्यु
तचंडालश्रृंगीदंष्ट्रीजलाग्निभिः॥ नखिसर्पादिभिर्बध्या दर्पक्रोधादि
नामृता॥ न कुर्याद्दहनाद्यौ चोदकमेषां हतो यदि॥ नोपतिष्ठति तत्सर्व
मंतरिक्षे विनश्यति॥ गंगायां प्रक्षिपेद्दंहं सरित्स्वन्यासु वा ततः॥ वैताग्नि
प्रक्षिपेदप्सु गृह्याग्निं च चतुष्टये॥ यत्तु पात्राणि सर्वाणि लौकिकेनाग्नि
ना दहेत्॥ तेषां शवानां स्पर्शन स्नानात्स्करणादिकं रज्जुछेदाश्रुपातादी
नां ज्ञानतो करणे महासंतापनं॥ अज्ञानात्तु तत्कृच्छ्रं ऐकैकं करणे नक्ता ना
दुपवासः गमस्याद्रच्छ्रो ऽतिकृच्छ्रः॥ अभ्यासे एवं॥ आहिताग्निमृतो विशेषः वि

॥८१७

शेषेणात्महातकः॥ अत्र तु विशेषः॥ अस्थीन्याहृत्य कृष्णाजिनस्योपरि पुरुषा
कारेण स्थापयित्वा मेषरोमभिस्तान्याच्छाद्य गव्येनाज्येन तान्यस्थीन्यभि
घार्याग्निविहरणादिस्नानांतः पूर्ववद्दाहः कार्यः॥ ततः प्रभृति सर्वेषां दश
रात्रं तु सूतकं॥ सूतिकारजस्वलायाश्च विदेशमरणे तत्र प्रायश्चित्तस्नानादि
शुद्धिं च विना दाहे कृते तदस्थ्नां प्रायश्चित्तपूर्विकां स्नापनादिभिः कूष्मांडहोमा
दिभिः शुद्धिं विधाय कृष्णाजिने निधानादि कृत्वा पूर्ववत्तेषु पुनः कूष्मांडीहो
मादिभिः शुद्धिमापाद्य यथोक्तदाहः कार्यः॥ अस्थीनलाभे पलाशवृं[illegible]णां ना७
षष्ठिकास्त्रीणि शतानि आनीय तैः पुरुषाकारं कृष्णाजिने कृत्वोर्णाभिः प्र
च्छाद्य गव्येनाज्येनाभिघार्य पूर्ववद्दाहः कार्यः॥ अत्र वृंतानि दूषदग्धान्ये
न कृत्वा तेषामेव संचयनं॥ पितृमेधश्चैतैरेव भवति॥ इदं च कृष्णाजि
नमभ्येतं॥ दर्शपौर्णमासिकस्य पूर्ववच्छेदनदाहकालेपि नियोगात्॥
न चास्मिन्पक्षे संचयनं॥ पाक्षिकत्वादर्थलोपाच्चेति वासुदेवः॥ अत्र वृंते

॥८१

शाखापत्रपरः॥ अस्थ्यालाभे पलाशत्रोश्लेषत्रैः कार्यः॥ पुमानग्नीति ब्रह्मपुराणा
त्॥ एपर्णतरं दग्ध्वा॥ रात्रमशुचिर्भवेदित्यस्माच्च॥ तेन संवृतानि पत्राणि
ग्राह्याणीति बधकत्॥ एवं पर्णतरं दग्ध्वा त्रिरात्रं॥ केचित्पलाशवृंतान्यु
पगृह्यंत इत्याहुः॥ अत्रैवं वृंतविभागः॥ चत्वारिंशच्छिरस्थाने ग्रीवायां च दश
वत्तु॥ उरस्थाने वा दंतं दधत्सष्टिश्च जठोदरे॥ बाह्वोः स्थाने शतं दद्यात्त्रिंश
ति जानुजंघयोः॥ दद्याच्चत्वारि शिश्ने तु षट् दद्याद्वृषणद्वये॥ पादांगुलीषु
तु दश कल्पयेदस्थिसंग्रहं॥ संचयः पितृमेधश्च स्मृतस्तत्रापि पाक्षिकः॥
तथा अस्थिनिवेदलभते प्रोषितस्याग्निहोत्रिणः॥ पत्रोपलाशवृंतानां ष
ष्ट्याधिकशतत्रयं॥ कृत्वाजिने नराकारं कृत्वा वेष्ट्यान नेतरं॥ ऊर्णासूत्रे
ण बध्वेव यवपिष्टैः प्रलेपयेत्॥ निर्दिश्य देवदत्तोयं नाम्नैवांस्या दाश्वलो
यनः॥ अकालेन दहेत्कृत्वा मृद्विग्धं संचयार्थिनः॥ ॥इति तथा पर्णनरे द
ग्धेषात्रस्याशौचं तासति॥ नतेष्वग्निः पुनर्दाहाय यद्यपूर्वं लभ्यते कचित्॥ ह
दार्द्र[illegible] दग्धकाष्ठानि तानि निर्मथ्य तेन दहेत्॥ यद्यपूर्वं दग्धं काष्ठं तु न दीयते

॥९०॥

१ तदा

तल्लभ्यते ॥ तदस्थिकं वेतुं च प्रक्षिप्तव्यं महाजले ॥ इति ॥ अत्र शांखायनानां विशेषः ॥ विस्तमासे चेदपि प्रयान्नास्ति तस्य समापनं ॥ आहवनीये सर्व हवींष्यनुप्रहृत्योपोहत्याग्निभिरिति संबंधः ॥ संहार्य रोमनखानि प्रेतस्य ॥ अनुत्यान्ते ॥ दक्षिणस्यां दिशि दक्षिणाप्रवणे देशे दक्षिण प्राक्प्रवणे वा ॥ अपेत वीतेति पलाशशाखया विमृज्य स्फ्येनोल्लिख्याभ्युक्ष्य प्राग्दक्षिणायां चितिं कृत्वा तस्याः पुरस्तादाहवनीयं निदध्यात् ॥ पश्चान्निधाय गार्हपत्यं दक्षिणतो दक्षिणाग्निं एवोध्वस्य शकटेनाग्नयोनीयंते यजमानश्चेदशक्तोनरात् ॥ अनेनैव गार्हपत्यं दक्षिणाग्निं च हृत्वा चितौ निदध्यात् ॥ उत्तानं प्राणायतनेषु हिरण्यशकलं निधाय स्रुक् दक्षिणे पाणौ जुहूं उपभृतं सव्ये ॥ ध्रुवां मुखे ॥ अग्निहोत्रहवणीं कंठे ॥ स्रुचौ नासिकयोः ॥ अग्निहोत्रवमेष्टिकं च प्राशित्रहरणं दक्षिणकर्णे प्रणीताप्रणयनं सव्यकर्णे ॥ शिरसि कपालानि ॥ अश्मग्रावाणः ॥ उदरे समवत्तधानी पार्श्वयोः पात्र्योः ॥ स्फ्यं दक्षिणे पार्श्वे ॥ कृष्णाजिनं सव्ये ॥ उपस्थे अरणी जंघयोः खीव

॥९०॥

ऽश्मान्नूखलमुशले ॥ यथाक्रमं पादयोः ॥ शूर्पं कटे ॥ कटाभावे पात्रीयतोग्निहोत्रपात्राणि उपवेषस्थाली कुर्वड्डीनि ॥ अवाहिताग्नेः पार्वणपितृयज्ञपात्राणि च ॥ कल्पैकत्वात् ॥ तानि वर्षंते न पृषदाज्येन च पूरयित्वा ॥ तानि जुह्वादीनि सर्वाणि पात्राणि प्रथममेव वध्यते न पृषदाज्येन च पूर्णानि ॥ सातनः सादयेत् ॥ नुसादनानंतरं पूरणं पात्राणामेवाण्याग्नेयदिगांतानि कार्याणि प्रेतू योदोन्वा ॥ ततो यं वै त्वमस्मादयोनयो निस्त्वसमंततस्ययोनिः ॥ जानवेदोवहस्वेनं सुकृतां यत्र लोकः ॥ अयं वै त्वमजनयदयं त्वामधिजायतां मस्वाहेति च योदं अग्निभिः ॥ असादिति प्रेतनाम गृह्णं प्रथमंतं उपोहंति अग्निभिः प्रापयंति ॥ इत्याहिताग्न्यनाहिताग्न्योर्दाहविधिः ॥ ॥ शुभमस्तु ॥ ॥ शांतिरस्तु ॥ ॥ आहिताग्नेर्नवान्नप्राशने प्रायश्चित्तमुच्यते ॥ यजमानः सपत्नीकः आग्रयणेनाऽनिष्ट्वा यदि नवान्नमश्नीयात् ॥ तदा अग्नये वैश्वानराय द्वादशकपालं पुरोडाशं

॥९१॥

निर्वपेत्॥ नवस्येति व्रीहियवयोरूपसंहारार्थं॥ ताभ्यां यागविधाना
त्॥ तेन व्रीहियवावहुतौ नाश्नीयात्॥ अश्नीयाच्चेद्वैश्वानरं निर्वपे
दिवासुदेवः॥ आश्वलायनब्राह्मणे॥ य आहिताग्निराग्रयणेनानि
ष्ट्वा नवान्नं प्राश्नीयात्॥ का तत्र प्रायश्चित्तिरिति सोऽग्नये वैश्वानराय
द्वादशकपालं पुरोडाशं निर्वपेदाहुतिं वाहवनीये जुहुयादग्नये वैश्वा
नराय स्वाहेति॥ अथर्वणे तु नवान्नप्राशने वाऽन्नहोमेन च समानमेव प्राय
श्चित्तमुक्तं॥ तथाहि॥ अथ योऽहुत्वा नवं प्राश्नीयादग्नौ वा गमयेत् का तत्र
प्रायश्चित्तिः॥ सोऽग्नये व्रतपतये ष्टाकपालं निर्वपेदिति॥ आग्रयणम
कृत्वा नवधान्यं श्राद्धादावपि न ग्राह्यमित्युक्तं वृद्धश्राद्धकल्पे॥ अत्र
कारिकाकारः॥ नानिष्ट्वा नवसस्येन पशुना वाग्निमान् द्विजः॥ नवा
न्नमद्यान्मांसं वा दीर्घमायुर्जिजीविषुः॥ नवेनानर्चितो ह्येन पशुह
व्येन चानलः॥ प्राणानेवाऽत्तुमिच्छेत्स तस्मादाग्रयणं चरेत्॥ नामा

॥९१॥

कान्वेण वा व्रीहिन्यवानाग्रयणात्पुरा॥ न भुंजीतेति विस्पष्टं यज्ञपार्श्वे निरू
पितं॥ दत्त्वैव ब्राह्मणेभ्यश्च कृत्वा वा वैश्वदेविकं॥ अनन्नवान्नमश्नीयादि
ति बोधायनोऽब्रवीत्॥ नवाशननिषेधोयं द्वयोरुभयोः समः॥ नवस्यो
वध्यपेक्षत्वादस्मिन्नवधिरुच्यते॥ कियाद्दूरं पुराणत्वं नवत्वं कियदिति चेत्॥
सस्यानामवधिर्ज्येष्ठीपौर्णमास्योर्मध्ययुद्भवं॥ धान्यं तं नवमित्याहुस्त
त्कालाग्रयणं प्रति॥ तदेव च पुराणं स्यादूर्ध्वमाग्रयणेषु च॥ यद्वाग्रयणे शा
स्त्रतुन्नवत्वावध्यपेक्षणे॥ यत्कालास्तेषु द्विस्थास्तन्योन्यावधयो मताः॥
प्रावृट्कालात्परं पक्वं शारदाग्रयणे नवं॥ शारत्कालात्परं पक्वं वसंताग्रय
णे नवं॥ ऊर्ध्वं वसंतान्निष्पन्नं प्रावृडाग्रयणे नवं॥ प्रत्यासन्नं तु शरत्काद्वा शा
स्वयमेवावधिर्भवेत्॥ यस्मिन्नाग्रयणं कुर्यादितोऽतद्धेतुसंभवं॥ धान्यं त
न्नवमित्याहुरर्वाक्पक्वं पुरातनं॥ एवं सति शारत्कालमात्राग्रयणकारि
णः॥ शारत्कालं नवे सस्यमर्वाक्पक्वं पुरातनमिति॥ व्रीहियागस्य याः का

त्रेपकोद्रेहेन संस्कृताः॥ शेषावावनयागेन यदि यागात्पुरा कश्चित्॥ कुष
धिं भक्षयेत्को चित्तत्र वैश्वानरः स्मृतः॥ इति वासुदेवः॥ तस्माद्व्रीहिपाक
समयादुत्तरकालयोः पच्यंते तासां सर्वासां यवयोगेन संस्कृतानां भक्षणाधि
कारः॥ यवपाकसमयोत्तरकाले पक्कानां च व्रीहियागसंस्कृतानां भक्षणमि
त्तियाज्ञियाः॥ तथा॥ मनुष्यैरुपजीव्यानां पशुभिश्च यथायथं॥ तृणगुल्मल
तापुष्पपत्रादेः भक्षणमिति च याज्ञिकाः॥ मानवं॥ अग्नये वैश्वानराय
द्वादशकपालं निर्वपेच्छ्रोन्याग्निषु यजेत तस्य वान्येग्निषु यजेरन्निति॥
तथा आपस्तंबसूत्रे॥ वैश्वानरं द्वादशकपालं निर्वपेत् यदि पत्नीः संयु
जयत्कपालमभिजुहुयादेतामेव निर्वपेच्चोदर्शपूर्णमासयाजी स्यात् कमे
व निर्वपेच्चोः दृत्वाग्रयणं नवस्याश्नीयादानीतो वा एष देवानां यआहि
ताग्निरदन्यस्य देवा अन्नं यदहृत्वाग्रयणं नवस्याश्नीयाद्देवेभ्यो भा
गं प्रतिकृत्यमाद्याद्तिमाद्येदिति॥ येरपि व्रियंगुकोद्रवादिभिर्यागोन

क्रियते आग्रयणेना॥ निष्टा तेषामपि प्राशने वैश्वानरी भवतीति तद्भाष्ये॥
यस्य नाश्नीयादित्याश्वलायनः॥ नापिष्टा पशुना मांसमश्नीयात् नानि
ष्ट्वाग्रयणेन नवानामोषधीनां फलानीति शांखायनः॥ आहापस्तंबः॥ ह
रितयवशाकश्यामाधान्यानां फलानामनिष्ट्वापि प्राशने यथाकामीति॥
हरितवाश्यामाकगोधूमाः यत्त्वन्यज्जान्यं न वं यनाद्यनिज्याकोद्रवमा
षोमाषादिनातदपि न भक्षयतीति॥ तथाचापस्तंबसूत्रकारिकायां॥
यागोन क्रियते येस्तु गोधूमेर्माषकोद्रवेः॥ तेषामपि भवेदेतत्प्राश
ने केचिद [illegible] वन्॥ न वैशब्दस्य सामर्थ्यात्सामान्येन सतं त्विदं॥ वाक्यशे
षविरोधाच्च यदेतन्नमतेमम॥ असन्नो यजमानस्तु देवानामेष पच्य
ते॥ तस्मादन्नमदंतस्य यवव्रीह्यादिकेमखे॥ तस्मान्न देवतं ज्येस्या
दन्यत्कामं तु भक्षयेत्॥ तथापतितस्य भुक्त्वा प्रतिगृह्य पतितामहापा
तक्यादयः कर्मानधिकारिणः॥ तेषामन्नं भुक्त्वा तेषां किंचित्प्रतिगृह्य
वा वैश्वानरं निर्वपेत्॥ तथाविद्विषाणयोर्वा॥ विद्विषाणो द्कुरुषाणो॥

॥१३॥

द्विवचनोपदेशाद्योद्वेष्टि । यश्च द्विष्यते । तयोरुभयोर्द्वेष्यद्विषतोः भुक्त्वा
प्रतिगृह्य वा वैश्वानरं निर्वपेत् ॥ अयाज्यं याजयित्वा । मन्त्रादिभिर्योऽया
ज्यं तु कृत्स्नं याजयित्वा वैश्वानरं निर्वपेत् ॥ अविमेषं प्रतिगृह्य वा वैश्वान
रं निर्वपेत् ॥ उभयाद्द्या उभयतद्दत्स्वपरिष्टादधस्ताच्च दंता येषां ता
न्पुरुषाश्वादीन्प्रतिगृह्य वैश्वानरं निर्वपेत् ॥ यस्याग्निभिरन्यं याजयेयु
र्वा यजेत ॥ यस्य संबंधिभिरग्निभिरन्यो यजते ॥ यवाज्याग्निभिर्यजे
त तावुभावपि वैश्वानरं निर्वपेतां । यत्त्वस्य वैश्वानरस्याष्टाकपालत्वं सं
प्रदायैककर्मत्वोक्तं ॥ तत्कठसूत्रादिष्वप्यस्य वैश्वानरस्यैतेष्वेव निमित्ते
षु दृष्टादष्टाकपालस्य दर्शनान्निर्मूलमिति नादरणीयं ॥ ॥ इति नवा
रान प्रायश्चित्तं ॥ ॥ अथ चरुविदाहे प्रायश्चित्तं ॥ हविषि पुरोडाशादौ
समग्रे दग्धे अविशिष्टकर्माज्येन कर्मापवर्गान्तं संस्थाप्य पुनर्दग्धं पु
१३ न रोडाशाद्येव वादिकं हविः पुनरग्न्याधानादिकर्मापवर्गान्तं तस्मिन्नेव विहा
रे कुर्यात् ॥ ८ ॥ अष्टमी कंडीका ॥ ॥ अथ पशोः प्रायश्चित्तान्युच्यंते ॥

॥१३॥

यदि उपाकरणानंतरं प्राङ्नियोजनात्पशुः पलाय्य गच्छेत् ॥ तदा तत्स्थाप्य
गच्छंतं पशुं वायो एष ते पशुरिति सूत्रप्रयोगेण वायुदेवतायै तं पशुं अनुदि
श्य संकल्प्याऽन्यं पशुं तेन पूर्वालब्धेन पशुनाऽसमानवर्णेन समानवयस्केन च
पुनरुपाकृत्यालभेत ॥ नियोजनादूर्ध्वं तु नष्टो यदि प्राप्यते तदाध्वर्यवं
कृत्वा तेनैव यागः कार्यः ॥ अप्राप्तौ त्वाध्वर्यवं कृत्वान्येन सदृशेन यागः ॥
यः पशुः पलाय्य गतः स वायवे ~~[illegible]~~ अनुदिष्टः स यदि प्राप्यते तदा
तस्यालंभे आदरो न कार्य इति कर्कः ॥ तस्य नष्टस्य गवेषणे आदरो न
कार्य इति याज्ञिकाः ॥ यदि यूपे नियुक्तः पशुः प्रयाजेभ्यः प्राक् म्रियते
तदा तेनैव यागः कर्तव्यः ॥ अयं तु विशेषः ॥ प्राक्प्रोक्षणान्मृते आस्योप
ग्रहणं संज्ञपनप्रैषप्रतिप्रैषाणामभावः ॥ तस्य स्वयं मृतस्य पाणिरु
द्धादिषु दक्षिणाग्नौ होतव्याः ॥ सोमे मार्जालीये होतव्या ॥ अत एव ज्ञाप
कात्पूर्वं अग्निविहरणानंतरं विहृतान्यग्नयो धार्या इति गम्यते ॥ अ
न्यथा मार्जालीयस्याग्नीध्राद्दाहरणमिति गदाधरः ॥ अत्रायं पदार्थक्रमः ॥

॥९४॥

यदि नियुक्तः पशुः प्रयाजेभ्यः प्राक् स्कन्नः । तदा प्राक् प्रोक्षणान्मरणे आ
स्योपगूहनं न कार्यं । दक्षिणाग्नेर्मार्जालीयस्य वा परिस्तरणं । परिधी
नामासादनं स्रुच्यानुपस्पृश्ययोश्च । अन्यत्सर्वं तूष्णीं कर्म पात्राणां प्रो
क्षणं । यस्मिन्नग्नौ होमः करिष्यते तस्याग्नेः कल्पनं । परिधि परिधा
नं च । सोमे मार्जालीयस्य । स्रुच्यानुपस्पृश्ययोश्चाधानं । उपवाजनं ॥
संमार्गः । उत्तरवेदावुत्तराघारानंतरं मन्नस्यापि पश्चोरंजनं । ततः
प्रयाजादिकमग्निप्रणीते आहवनीये तु स्रुवाग्रमित्यादि न्वारब्धं पशुं न
यति । न संज्ञपयं । न तत्र प्रैषो । चात्वाले रशनाधारणादि वपोत्खेद
नांतं । ततो वपाश्रपण्यादानप्रभृति तूष्णीं आलंभनांतं । ततः स्कन्न
दापनादि स्वाहाकृतियाग आहवनीये समंत्रकः । शेषेण निरूढध्रुवा
दीनां सोमे वपादीनामभिधारणं । ततो जुह्वामुपस्तीर्य हिरण्यमव
धाय वपामवदाय पुनर्हिरण्यमवधाय यथाविधानं सरुद्ध्वाभिघार्य या
ज्यानुवाक्यावर्ज्यं यजमानः पितर इति मंत्रेण निरूढादिषु दक्षिणाग्ना

॥९४॥

वुपतिष्ठो वपां जुहोति । सोमे मार्जालीये जुहोति । इदं यमायेति त्यागः ॥
यत्र वपाहोमस्तत्रैवाग्नौ वपाश्रयण्योरनुप्रहरणं तूष्णीं । ततस्तूष्णीं मार्ज
नं । ततो निरूढादिषु पशुपुरोडाशादि कर्म । सोमे च समर्पणादि ॥ अ पश्वा
दौ हृदयादीनामवदानानां मध्ये एकस्यावदानस्य नाशादोषापहारो दोहृ
यो वा हुता वा नाशादौ एकप्रभृतिकतिपयावदानसद्भावे आध्वर्यवं हुत्वा सो
मश्चेत्कालाहुतिवाचनपूर्वकमाध्वर्यवं हुत्वा नष्टानामवदानानां प्रतिनिधि
भूतमाज्यं ध्रुवामाप्याय्याप्याय्य ध्रुवतः प्रत्यवदानं द्विर्द्विराज्यं गृहीत्वा ऽ
विनष्टवदाने सहोतव्यमिति संप्रदायकारिकाकारौ ॥ प्रत्यवदानं च तु
र्गृहीतं ग्राह्यमिति गदाधरः ॥ तत्र द्विर्गृह्य इति युक्तं । उपस्तारामभिघारा
भ्यां चतुरवत्तता संपन्नः । एकस्यावदानस्य सद्भावे अन्येषां सर्वेषां सहृद
यानां नाशादोषादावेवमेव कार्यं । सर्वेषामवदानानां नाशे तु पशुयागो
सिद्धेरनादिष्टहोमपूर्वकं पश्वंतरालंभः कार्यः ॥ अथ वा आज्येन देवताया

॥१९५॥ गेरत्वासमाप्यपुनरग्न्यन्वाधादिकर्मापवर्गान्तंपश्वंतरेणयागंकुर्यात्॥
सर्वनाशेहविषांदोषेवातदुक्तमाज्येनवाप्रतिसंख्यायेदेवतेज्यापुनःक्रि
यान्वेयुक्तत्वात्॥हृदयनाशेप्यऽनादिष्टहोमपूर्वकमाज्यमेवतत्प्रतिनि
धिमर्तंध्रुवान्तेहिरेवदेयं।नपश्वंतरालंभः॥स्विष्टकृदर्थानांसर्वेषांना
शेप्याज्येनैवप्रसवदानेहिद्विर्गृहीतेनतूपस्तरणाभिघारणाधिकेनयागः॥क्लो
मादीनांनाशेत्वाध्वर्यवहोममात्रेणाज्येनतत्कार्यप्रतिपत्तित्वात्॥जाघ
नीगुदयोर्नाशेत्वनादिष्टहोमपूर्वकमाज्येनतत्कार्यसंपादनीयं।इष्टंचे
दाज्येनशेषमितिवचनात्॥वसायानाशेप्याज्यमुपादेयं।लोहितोवध्व
नाशेत्वनादिष्टहोममात्रमेवावपानाशेत्वनादिष्टहोमपूर्वकमाज्येनच
तुर्गृहीतेनयागः॥अत्रशांखायनः॥अवदानेनष्टेदुष्टेविमथितेवाज्यं
प्रतिनिदध्यादिति।तथाहृदयनाशेअन्यमालभेत।इति।तत्राप्यवचनाशे
अन्यस्यालंभोनदुष्टविमथितयोः।तत्राज्यमेवोपादेयं।अस्मिन्पक्षेना

॥१९५॥

ग्निप्रणयादीनामावृत्तिः॥वपापशुपुरोडाशयोर्नपुनःक्रियावृत्तत्वात्॥ब
धानांसर्वेषामवदानानांपरित्यागः॥भारद्वाजकेवचनात्॥अंघ्रिगोराव
त्तिः॥शासनार्थत्वात्।उपप्रेषस्यवचनादप्यात्।मनोतापर्यग्निकरणानां
चावृत्तिःसंनिपातादिति।यदिपशुःशमित्राभार्यमाणोवावाश्येनतदाध्व
र्युर्वसाहोमहवन्यासकृद्गृहीतमाज्यंसमिस्रुवकमाहवनीयेयत्पशुर्मा
युमकृतेतिमंत्रेणजुहुयात्।इदमग्नये।ततःइमम्मेवरुणेतिद्वितीयामा
हुतिंसकृद्गृहीतेनैवाज्येनजुहुयात्॥इदंवरुणाय।ततस्तत्वायामीतितृ
तीयांतथैवजुहुयात्।इदंवरुणाय।अत्रानादिष्टहोमोनभवति।सोमेतुस
मायांपूर्वकालाहुतिमाग्नीध्रीयेहुत्वावाचंनरत्वायत्पशुरित्याद्याहुतित्र
यमाहवनीयेजुहुयात्॥अग्नीषोमेत्तुकालाहुतिरप्याहवनीयएवहोत
व्या॥अत्रशांखायनः॥आनीतेपशौमतेऽनुपाकृतेन्यमालभेत।विमथ्य
त्तंकारयेत्।उपाकृतेचेपमानेयस्माद्भीषावेपिस्ततोनोऽअभयंकृणुप

शून्यः सर्वानोपायन मोरुद्राय मीढुषे स्वाहेतिजुहोति। यस्माद्वीषा वासिष्टा इस्रूपाऽऽरूते वाऽऽयमाने। यस्माद्वीषा पलापिष्टाइस्रूपाऽऽरूते पलायमाने। यस्माद्वीषान्यस्य इस्रूपविष्टं। यस्माद्वीषा संस्रसा इस्रूपाऽऽरूते स्वयंमृते पलायिते वान्यं तदुर्यं तद्दृणंति देवस्य पशुमालभेत तम्य तस्य वर्णं पुरोडाशमवदानानीत रस्य वषट्कारे पूपजुहुयोस्व्रष्ट्रे नुप्रयाजेषुमते नैनैव संस्थाप्यमिति॥ ॥
तथामानवे विशेषः॥ यदि यूपमावृरुह्यालयेद्यायुतान स्तामारुत्वानिदं क्षितियथावस्थि स्थितमवस्य परिषेकं कुर्याद्यदि रशनां छिद्याद्दरोद्यात्र यस्थिं शातनवरस्येनयागं धिसंधायेत पैवजुहुयाद्यदि स्वरुर्नश्येत्स्वधितिवः नक्तेचौः न्ययूपैरशकलं जुक्तामकास्वरुंकुर्यात्स्वधितिरिशिमृज्यादेवं चषालमिति। यदि कर्मन विंदेत्कर्कंकघयमुपदध्याद्यदितेन विंदत्सुरोडाशं कूर्मावृतिं श्रपयित्वा हिरण्यपष्टमुपदध्याद्दुभयत्ने। हिरण्यमित्येक इति॥ ॥यदि पश्च रशनायाः वसास्त्रवेन्नान दातांस्त्रवंतीमुरवोऽभिमंत्रये

दध्वर्युस्स्वाऽस्त्रवतीमिति॥ सोमेन्वकारुकृतिवाचनपूर्वकं भुवपतये रुत्यभिमर्शनं सर्वं वभवत्येवह॥ ॥१॥ ॥द्वादशाहादावगर्णेतत्रमध्ये आर्द्रस्य यूपस्य निखातस्य रोहणे अंकुरोद्भवे संस्थितेहनित्वष्ट्रे देवस्य बहुरूपं वि-चित्रवर्णं॥ छागमालभेत॥ अनंतस्तं प्रमिस्रुके सात्वयोगसामायुत्तरकालं विरोहणेनेदं प्रायश्चित्तं॥ तथा च सूत्रांतरं॥ अथ नरवलु बहिरवभृथं विरोहणाद्भूषूमन्यतइतिशांखायनेः॥ यूपे विरूढे ऽनपबृत्नेत्वाष्ट्रं बहुरूपमालभेतेति मानवे॥ सत्रेचेत्त्राग पवर्गाद्यूपो विरोहेत्तो मित्यादि॥ काठके॥ यूप विरूढाः सत्रिणस्त्वाष्ट्रं मालभेरंस्त्वाष्ट्र्ति ऽस्वग्नइतिद्वाभ्यांजुहुयादुत्तरयायूपमनुपरितापयेदुत्तरयायूपविरूढानि। जुहुयादिति। अनेक यूप विरोहणे चैक एव त्वाष्ट्रः कार्यः॥ तदुक्तं सूत्रांतरे॥ बहुनपि समानजातीयान्नैषां सर्वत्र तत्सर्वं विभवेदिति। एवमनेकग्रावभेदानकदोहविनाशादावपि ज्ञेयं॥ अत्रैवं कर्म

रचना। अहः समाप्यनंतरं मतिप्रणीतेग्न्यन्वाधानं। द्विरासनं। ब्रह्मयजमा
नयोराहवनीयं दक्षिणेनोपवेशनं। ब्रतग्रहणाभावः यजमानं वाचयच्छ।
आहवनीयादीनां त्रयाणां परिस्तरणं। पात्रासादनं। प्रोक्षणीः संस्कृत्य पा
त्रप्रोक्षणं। असंचरे निधानं। कुकूटाहननं। आज्यानिर्वापणे वेदवर्ह्यः॥
आज्याधिश्रयणं। पर्यग्निकरणं। प्रोक्षणीप्रैषः। अंतः पात्रे सादनं। स्फ्यो
दक्समाहारः। न पाण्योरवनेजनं। स्रुक्संमार्जना। आज्यासादनांते त्रिवर्हुदेः
स्तरणं। प्लक्षशाखास्तरणं इति विशेषः। पशोरुपाकरणादि त्वष्ट्रे जुष्टमि
ति। त्वष्ट्रे छागस्य वपाया इति विशेषः। पशुपुरोडाशो प्रणीताज्यभागाः॥
त्वष्ट्रे पुरोडाशस्यानुब्रूहि। त्वष्ट्रे पुरोडाशं प्रेष्यति। त्वष्ट्रे छागस्य हविषो
हविरिति चान्होमादीनां नियमः। दक्षिणायाश्च भावः। न स्वकृहोमः॥ त्व
ष्टुर्वनस्पतेरुज्जितिं। त्वष्टा वनस्पतिस्तमपनुदतामिति व्यूहनं। त्रीणि
समिष्टयजूंषि। समिष्टस्य यजुरंते वर्हिर्होमः। म्लावभृथः समिदाधा

नांतः। प्रणीताविमोकः। रक्षसां भागः। भागोवक्षणं भागप्राशनं इति॥ ॥
अथातु वंध्यायां गर्भसद्भावे गर्भसंदेहश्च प्रायश्चित्तमभिधीयते। स त्वत्र स्तः प
शुरित्यस्मादनंतरं वपा[illegible]मश्विदेति च शमिताः ध्वर्युः प्रेष्यति। ततोध्व
र्युर्वपायाः परिवासनांतरमनुमर्शनं गर्भमेष वे इति शमितारं प्रेष्यति॥
स प्रेषितो नूवंध्याया उदरमध्ये हस्तं प्रवेश्याप्यग्नेन गर्भसद्भावे विलो
कयति॥ गर्भसद्भावनिश्चिये शमितास्थाली चेवोष्णीषं चोपकल्पयीत॥
वाइति प्रेष्यति ततोध्वर्युः स्थालीमुष्णीषं चोपकल्पयति॥ ततो वपायाश्च
तालावसेकादि वपामार्जनांतं कृत्वा॥ ततोनपेक्षमध्वर्युर्यजमानो वा गस्या
ध्वर्युः शमितारं प्रैषद्वयं ददाति। निरूहेतं गर्भमिसेकः। विरुज्य श्रोणीप्र
त्यंचं निरूहितवाइति द्वितीयः। एकस्यामनुवंध्यायां गर्भानेकत्वे यन्नूहः
प्रवृत्तिवन्नूति छन्नूवंध्यासु तु भवति। निरूहेतो गर्भो निरूहेतां गर्भाविति
त्रि॥ एवं प्रत्यंचो प्रतीचइत्यत्रापि। एवं प्रेषितः शमिता वपायोनिप्रदे

रं पाटयित्वा सकलं गर्भं निष्कासयति । ~~स्वंभूयंचोश्रतीचरस्तमपि~~ स्वधिते ~~धिते~~ः शाखान्याः प्रचरण्याश्च तूष्णीमासादनप्रोक्षणे । गर्भस्य कंठमधस्ता
दवत्तस्य छित्वा शाखाभ्यां निष्कास्यमानं गर्भं एजतु दशमास्य इत्यभिमंत्र
यतेऽध्वर्युः । मेधश्रावणं । ततः पुरोडाशादि । तत्सोत्रसंमार्गकाले प्रचरण्या
स्तूष्णीं संमार्गः । अवदानादि श्रपणांतं । अनंतरमुखवास्यष्टमेधस्थाल्याम
धिश्रयणं । गर्भमुष्णीषेण वेष्टयित्वा शामित्रसमीपे निदधाति । ततः श्रा
मित्रानुद्वासनादि मेधस्य तत्र स्थाभिघारः । भावः । तूष्णीं प्राणदानं । अ
वदानवत्त्वाद्दक्षिणतो मेधस्थापनं । अवदानान्याज्य तस्य तूष्णीं मेधालंभः ॥
वशावदानानंतरं प्रतिप्रस्थाता प्रचरण्यामुपस्तारः । मेधस्य द्विः स्रुवेणा
वदानं । प्रत्यपस्तारः । क्षताभ्यंगः ।
प्रधानहोममनु प्रतिप्रस्थाता यस्येत इति होमः । प्रचरणीमंतरा यूपाग्नी हुत्वा
जुहोति स्थानेन गत्वा होमः । धुंगर्भे यस्यंतो । स्त्रीगर्भः । यस्योतां । विकृतिषु गर्भो

नेकत्वे यूयोस्ते त्रिषु यासां ता इति । स्त्रीषु गर्भो ~~यस्ये~~ समावाये पुंवन्मंत्रः ॥
अविज्ञाते गर्भे चा इदं वशाये । प्राक् स्विष्टकृतः प्रतिप्रस्थाता पूर्वेण यूयं
धा स्यागस्य प्रचरण्यामुपस्तीर्य सर्वं मेधमवदाय द्विरभिघार्य पूर्ववद्
दुत्तरतो गत्वा स्विष्टकृतमनु पुरुदस्म इति जुहोति । इदं गर्भायातः
समिष्टयजुर्भ्यां तेऽध्वर्युर्जुहुयामुपस्तीर्य तूष्णीं गर्भमवधाय द्विरभिघा
र्य शामित्रे प्रथमं संत्ते तं गारेषु प्राङ् तिष्ठन्मरुतो यस्येति मात्रेण स्वा
हाकारवर्जितेन हुत्वा । महीद्यौरित्यंगारे गर्भमाधाय दयति । इदं मरुज्ज्ञः ।
अतिरात्रे वाजपेयादौ भेषीवशाप्रभृत्यादिस्त्रीपशुषु गर्भसद्भाव एव
मेवज्ञातव्यं समानन्यायात् । आपस्तंबभाष्ये दर्शनाच्चा । रस्यनबंध्याया
गर्भसद्भावे प्रायश्चित्तं ॥ अथाग्निहोत्रे कूर्चासादनोत्तरकाले होमाः श्रा
गाहवनीये शांत्ये गार्हपत्ये आज्यं संस्कृत्य जुहूं संमृज्य हुत्वा गार्हपत्यं प
रिस्तीर्य समिधमादाय प्राण उदानमायगाव स्वाहा । इति जुहोति । इती

इं प्राणायेति त्यागः॥ होष्यं स्यादिति वचनान्ते होमान्तहोमादूर्ध्वमिदं दत्य
ग्निहोत्र इत्युक्तत्वान्नेष्यादेः॥ आसन्नेषु पात्रेषु गार्हपत्यहोमात्प्राक् गार्हप
त्यः शाम्यतदा गार्हपत्यं मथित्वा संस्थाप्य तत्राज्यं संस्कृत्योदनं प्राणमथ गोस्वा
हेति मंत्रेणाहवनीये समिदाधानपूर्वकं स्रुवगृहीतमाज्यं जुहुयात्॥ इदमुदा
नायेति त्यागः॥ अत्राहवनीयजागरेणैव स्याद्भूपोपायेन गार्हपत्यसंपादनं का
र्यमिति याज्ञिकाः॥ मथितेत्वेवं न्यसे सर्गे दक्षिणाग्निहोमात्प्राक्पात्रासाद
नोत्तरकालं दक्षिणाग्न्युपशमे गार्हपत्ये आज्यं संस्कृत्य समिदाधानपू
र्वकं स्रुवगृहीतमाज्यं जुहुयाद्गार्हपत्ये जुहोति व्यानउदानमथ गा स्व
स्वाहा॥ इदं व्यानाय॥ ततो दक्षिणाग्निमाहृत्याग्निहोत्रहोमः॥ पात्रासा
दनोत्तरकालं वायौ वाति प्राक् होमात् सर्वेषां त्रयाणामप्यग्नीनामुपश
मने सत्वरं गार्हपत्यं मथित्वा स्थापयित्वा प्रतिवातं वातो यां दिशं प्रति
गच्छेत् स्यां दिश्याहवनीयमुद्धृत्य गार्हपत्ये आज्यं संस्कृत्य स्रुवगृहीते

न परिस्तरणसमित्सूर्विकां वायवे स्वाहेत्याहुतिमाहवनीये जुहुयात्॥
इदं वायवे॥ ततः आहवनीयमुत्पाद्य यथास्थाने स्थापनं कार्यं॥ ततो द
क्षिणाग्निमाहृत्याग्निहोत्रहोमः॥ अथ यस्मिन्समये वायुर्न वाति॥ तयो
प्यग्न्युपशान्ता॥ तदा तूर्णं गार्हपत्यं मथित्वा प्रायाद्दिशो वाहवनीय
मुद्धृत्य गार्हपत्ये आज्यं संस्कृत्याहवनीयस्य पश्चादुपविश्य स्रुवमे
व तस्य संस्कृत्य स्या॥ ज्यस्य स्थाल्यां स्थस्येव पानं कुर्यात्॥ अत्र सेवप्रा
यश्चित्तिरिति सर्वत्र श्रवणान्नैमित्तिकत्वं वेषां॥ न संप्रदायोऽस्मत् अग्निहो
त्रविकारत्वमिति कर्कयाज्ञिकारिकाकारः॥ वासुदेवस्य सर्वत्रैवदि
त्यस्मिन्सत्रे यथानुपूर्व्यकरणं॥ आहवनीयस्य पुरस्तात् दक्षिण
स्य दक्षिणस्यां शेषसमापनायनयनेमिति वदन् प्रधानोऽग्निहोत्र
स्यवोऽयं व्याकृत्येव सिद्धिरिति दर्शयति॥ निर्वातेनैव दित्यत्र पूर्ववद्यथिवसं
योतरस्यानुपदे शाम्ल्छ॥ व्युन्नीतस्य स्वयं पानं पाश्चात्केचैनिदयानि

॥५०॥ तदेतद्विस्तृतमग्निहोत्रं सप्रायश्चित्तिरिति तथाग्निहोत्रं सर्वदेवते
मिति वदनानीतरामुग्न्यादिनिरासो नाध्यादेः प्रसंस्यम्नानात्‌। तेनवाय
व्याहुतिः स्वयंपानं चैवस्तंमग्निहोत्रमेव तथा चापस्तंबः॥ यदि प्राग्धो
मकालादाहवनीयानुगच्छेत् गार्हपत्यात्पस्यं प्रणयेद्यदि होमकाले प्राणउदा
नमध्यगादिति गार्हपत्ये जुहुयाद्यदि सर्वेनगच्छेयुर्न्ने ग्निं मुष्पितायां दि
शं वातो वायोतो दिशामुद्धस्यो वायवे स्वाहेति जुहुयाद्यद्युवेनिवातेम
थित्वा विहारं सादयित्वा परेणाहवनीयं यजमान उपविश्य पिबेदग्नि
होत्रप्रत्याम्नायो भवतीति विज्ञायत इति॥ ॥तत्र तत्पथ भाष्यपि माधवाचा
र्ये रेवं व्याख्यानमस्ति॥ अतो विस्तृतिरूपमग्निहोत्रमेवेतदभ्यदिते
श्चिवदिति युक्तं॥ धूर्तस्वामिस्तु नेभाष्ये॥ केचित्तु प्राणउदानइत्याद्या अग्नि
होत्रप्रधानाहुतयः पूर्वाहुतिस्थान इत्याहुरिति॥ नवाते चेदित्यत्र पूर्वमाह
वनीयसंपादनमर्न्नो स्सभानन्यायेन पूर्वं स्थ्यपाहवनीयाद्यनुगमादिनि ॥५०॥

मित्तेष्वपि अनुगतस्य संपादनं पूर्वमेव कार्यमिति याज्ञिकाः नैमित्तिकानंत
रमेवेत्यन्ये॥ सायंप्रातरहोमस्य कालातिक्रमे तु स्थाने आहवनीयमुद्धृत्य
मनोजूतिर्जुषतामाज्यस्येति मंत्रेण संस्कृताज्येन स्रुक् गृहीतेन समिदाधा
नपूर्वकमाहवनीय आहुतिं जुहुयात्‌। इदमग्नये ज्योतिष्मते इति॥ अत एवा
नेकादिनहोमविच्छेदेप्येकैव॥ सायंकालेग्निहोत्रमहुतं चेदनाष्टं वृत्ता प्रास्ता
यमुद्धरणाद्धोतव्यं॥ उद्धरणकालेपि पतिस्तदा मनस्वीतिलुप्तहोमत्रयेन द
र्शपौर्णमासादिषु॥ तथाग्रयणयुग्मेतु गेतंतुमतीभवेत्‌॥ इतिकारिकायां॥
तथा च मानवे॥ यथाजस्तं विच्छिद्येनानतरितं होमान्तश्चाग्नये तंतुमतेष्टाक
पालं निर्वपेदयित्वा पूर्णाहुतिं हुत्वा नाद्रियते होमान्सायंहोमेन प्रतिपद्य
तेति॥ तथा चापस्तंबः॥ यस्याग्निहोत्रं विच्छिद्येत व्यहोत्रहेच्चतुरहेवाग्न
येतंतुमतेष्टाकपालं निर्वपेदिति॥ आथर्वणसूत्रे॥ अथ यस्याग्निहोत्रंस्त
तीयेहोमकाले विच्छिद्येत कालतत्र प्रायश्चित्तैः सोग्नये तंतुमते ष्टाकपा

त्तंपुरोडाशंनिर्वपेदिति॥१०॥सत्रंकरिष्यामीतिसंकल्प्यदेवान्मानुषाद्वा॥
कारणात्सत्रकरणाद्युक्तो विश्वजिताऽतिरात्रेणाग्निष्टुतदक्षिणेनयजेत॥
अत्रपरमेष्ठिनइतिकालकृतेरभावः विशेषविधानेसामान्यस्याबाधा
त्॥यदिसत्रार्थंदीक्षितदीक्षिणायजमानानांदेवान्मानुषाद्वाकारणादपरिसमा
प्तएवसत्रेउत्थानंजायेततत्रजातसत्रेनैवसमापयिष्यामइतिबुद्धिरु
त्पद्यते।तदासोमंविभज्यसोमोपलक्षितंसर्वसाधारणंद्रव्यंधान्यघृत
सोमादिकंविभज्यात्मीयंपृथक्कृत्यतेनैवपूर्वसत्रोक्तेनैवविश्वजिताऽति
रात्रेणसर्ववेदसदक्षिणेनसर्वपृष्ठेनयजेरन्॥सर्वपृष्ठत्वादत्रप्रार्थनेया
स्याग्रहाग्रह्यंते।सर्ववेदसदक्षिणात्वादश्वदाभ्यौतिस्रोनूबंध्यास्त्रेधा
तव्याद्वसानीयामासोमक्रयानंतरंक्रियमाणेविश्वजितिसोमंक्रीतासा
त्रिकंसोमंतन्मध्येमिश्रयेत्॥तथाचोप अथसूत्रेविश्वजितीत्यन्यस्त्र
क्रीतेसात्रिकंसोममपिसृजेयुरिति।सत्रार्थदीक्षितस्याममाप्योत्थ।

नेविश्वजितःश्रवणादहीनेदीक्षितस्योत्थानेइदंप्रायश्चित्तं।उत्थाननिमि
त्तत्वाच्चयावंतोसमाप्तउत्तिष्ठंति एके।देवहचोवान्तेसर्वेपृथक्पृथक्वि
श्वजितंकुर्वंति।सखलुविश्वजिन्नकामादुत्तिष्ठतस्याद्यन्तत्वेनसंसत्रि
णोवारन्यत्रवाभ्यजाविलोपःस्यात्॥यत्रनैवंतत्रलोपोव्याधिःस्पर्शोधेनो
तःसत्रप्रायणाछंकेतनदुत्थायस्यादि।युक्तेवेनजीकोह्यनुमतःशास्त्रा
र्थानुष्ठानमंगीकृत्यंतदुत्सर्गश्लिष्टविगर्हितमकारणमेवागीकुर्यात्॥
इति।सोमेक्रीतेऽक्रीतेवाप्रवृत्तमात्रस्योत्थानेइदंप्रायश्चित्तंभवति॥
अग्निष्टोमादौपवमानार्थंसमन्वारब्धानांगच्छतामध्वर्य्वादीनांमध्येद
क्षिणादानात्प्राक्प्रातःसर्वमेयच्छिन्नातप्रस्तोतुःसकाशादपच्छिद्येनवि
सृष्टोभवेत्।तदानंप्रारब्धंयज्ञंदक्षिणादानावर्जितंसमाप्यतस्यैवयज्ञ
स्यऋत्विग्वरणादिपुनःकरणं।यच्छिन्नोनापछिद्यादक्षिणंतंयज्ञंद
[illegible] मिष्टातेनपुनर्यजेतेनतत्रदद्याद्युसर्वस्मिन्दास्यंस्या
दितिशाखांतरेश्रुतत्वात्॥अथादक्षिणेक्रतौदक्षिणहोमाभावः।ऋत्वि

॥५०२॥

दक्षिणाव्यतिरिक्तमन्यत्सर्वं भवति॥ तथा च कारिकाकारः॥ अदक्षिण
स्तोमस्य हेमादक्षिणसंज्ञका॥ गमनं तु भवेन्मध्ये दनादेरनुगच्छतो॥ प्र
दागमनमिक्षान्च भवेदात्रेयदक्षिणा॥ प्रसमदक्षिणामध्योदनदाने भवेदि
हति॥ यदि प्रातःसवने माध्यंदिने वा प्रस्तोता विच्छिद्येत प्रतिप्रस्थातुःसका
शात्स्थकर्म भवेत्॥ तदा ब्रह्मणे उदरं दत्त्वा पुनःप्रस्तोतुरेवैकस्य पुनर्वरणं
कुर्यात्॥ स एव पुनर्वरीतव्य इति धात्विंशब्राह्मणदर्शनात्॥ यदि प्रातः
सवने प्रतिहर्ता समन्वारब्ध उद्गातुःसकाशाद्विच्छिद्येत तदा न किंचिन्नेव
यजमानः सर्ववेदसं दक्षिणां दद्यात्। वेदो धनं। सर्वं वेदः सर्ववेदसं। सर्वं धनमि
त्यर्थः। स च क्रतुस्तथा तयानिर्दिष्टव्यतिरिक्तं। अन्यथा क्रतुसामाप्त्यसि
द्धेः। अतीतासु चेद्दक्षिणासु विस्कंदेत्तदा तृतीयसवने आभवेयथवनार्थे गच्छं
तां प्रतिहर्त्तरपच्छेदे अनादिष्टमेव कालं क्रुति पुनःसरं भवति। अन्यस्या
नुक्तत्वात्॥ ॥ यद्युद्गातृप्रतिहर्त्तारौ युगपदेकस्मिन्काल एव विच्छेदो भव

॥५०२॥

ति तदा प्रायश्चित्तयोः परस्परं विरोधाद्विकल्पो भवति। उद्गातृच्छेदनिमि
त्तं वा प्रतिहर्तृपच्छेदनिमित्तं वा प्रायश्चित्तं कुर्यादिति। यदि तदा तृप्रतिहर्त्रोः क्र
मेण विच्छेदो भवति। पूर्वमुद्गातुः पश्चात्प्रतिहर्तुर्विपरीतं वा। तदा यः पश्चा
दपच्छिन्न उद्गाता प्रतिहर्त्ता वा तं निमित्तं प्रायश्चित्तं कुर्यात्॥ न तत्र यदा ज्यो
तिष्टोमादौ पूर्वमुद्गाता विसृष्टः पश्चात्प्रतिहर्त्ता तदा तस्मिन्नेव प्रयोगे सर्व
स्वं देयं। यदा च पूर्वं प्रतिहर्त्ता यच्छिन्नः पश्चादुद्गाता तदोत्तरस्य निमित्तस्य
बलवत्त्वात्तं प्रयोगे सदक्षिणं संस्थाप्य पुनराहारस्तस्यैव सोमस्य पुनःक
रणं तत्रैव च सर्वस्वं दक्षिणा। तत्र तद्वाद्यत्सर्वस्मिन्दास्यं स्यादिति वचनात्॥
॥ द्वादशाहादावहर्गणे यस्मिन्नहनि यस्यां सुत्यायामुद्गातुरपच्छेदो भ
वति मदेवकमहरे दक्षिणं स्थाप्य नस्यैवैकस्याह्नः पुनराहारः पुनःक
रणं भवति। न सकलस्याहर्गणस्य प्रतिहर्तुपच्छेदे तु तस्मिन्नेकस्मि
न्नहनि सर्ववेदसदानं। सोमयागे दीक्षितस्य पत्नीयदारजस्वला भवति। ज

॥१०३॥

तदादीक्षारूपाणि परिधानवस्त्रोत्तरीयशंकुमेखलोष्णीषादीनि यावत्तं क
स्त्वानि दध्यात्॥ अत एव निधानोपदेशः शुद्धोत्तेषामेव ग्रासः प्रभृतिना
मुपादानं॥ पत्नी वक्ष्योहि तत्र वर्तितावत्कालं शालासमीपे सिकतासूपविशे
त्॥ सायंकाले अस्तमयात्प्रागारभ्य नक्षत्रदर्शनपर्यंतं॥ सिकतासु तिष्ठेत्॥
प्रातःकालेरुणोदयादारभ्य सूर्योदयपर्यंतं सिकतास्वेवातिष्ठेत्॥ पत्नीव्र
तदुधायानदोहने॥ व्रतमयो ह्योह विष्णमश्नीयादित्यापस्तंबवचनात्॥
च तो व्रतदुधांधुक्षेति न प्रेषः॥ सुत्यासु मेध्यरजस्वला पत्नी वेदिसमीप
सिकतासूपविश्य संधिवेलयोस्तिष्ठेत सिकतास्वेव॥ अत्र मार्जालीयसमी
पे परिश्रितं कृत्वा तन्मध्ये सिकतास्वेवावस्थानं पूर्ववत् शालासमीप इ
ति धूर्तस्वामिनः॥ रजस्वला हवींषि नापेक्षेत न च स्पृशेत्॥ यदि प्रमादा र
जस्वला गार्हपत्यादीन् स्पृशति तदा तानग्नीन्परित्यज्य पुनराधा
यमाह भारतोत्कस्तु चीष्टिः कर्तव्या॥ ॥उत्तरवेदिकाग्नीध्रीयशामित्रप्रावर्ग्य

॥१०३॥

धिष्ण्यानामसीनां स्पर्शे स्पृष्टान्परित्यज्य त्वयोनिमंतु मनादिष्टं होतव्यं॥
एवं गार्हपत्यव्यतिरिक्तानां स्पर्शे सर्वत्र ज्ञेयं चांडालाद्यस्पर्शनिषेध ज्ञेयं॥ अन्यो
पहतौ तूपसमिंधनं॥ तथा चापस्तंबः॥ यदि हविः प्रोक्षणेग्निनाभिप्रोक्षोढ्ने
न येज्ञेन ये ज्ञेन पुनरग्न आदित्या रुद्रा वसवः समिंधतामिति पुनरपि समुपसमि
ध्यादेवं सर्वेष्वग्निषूपधामेति॥ उपसमिंधनं च समिद्धस्यापि पुनः समिधानं॥
हविःप्रोक्षणग्रहणं पर्युक्षणादि वृथ्युपलक्षणार्थं॥ चंडालमहापातकि च
रजस्वला व्यतिरिक्तोप्रयतस्पर्शे चोपसमिंधनं॥ चांडालमहापातकिस्प
र्शे पुनराधानं॥ रजस्वलास्पर्श इति कं॥ मूत्रपुरीषसंसर्गे विशेषमाह बोधाय
नः॥ अमेध्यस्पर्शे निसमारोप्य मथित्वा पवमानेष्टिरिति॥ सूतिकाशव स्प
र्शे विरुध्यानमिति केचित्॥ अन्ये तु एवं सर्वेष्वग्न्युपधानेष्विति वचनादुपसमिं
धनमित्यापस्तंबसूत्रकारिकाभाष्यो॥ अत्र कारिकाकारः॥ दीक्षितस्य य
दा पत्नी कर्ममध्ये रजस्वला॥ समाप्यतं दहः कर्मपरतिर्यत्न कर्मणः॥ य

॥७०३॥

जमानस्यवाग्बंधव्रतनिद्रादिकंभवेत्॥आर्त्विकादाचान्नकर्तव्यंतत्कर्मानधि
गतः नह्यत्रवचनंयदृत्विक्षष्ठ्यांपत्न्यतिक्रमोद्दतिपत्न्यारजस्वलायांसूति
कायांवाप्रारब्धंकर्मक्रियतएतेतिगदाधरः॥तथाचत्रिकांडमंडनः॥र
जोदोषेसमुत्पन्नेसूतकेमृतकेपिवा॥नित्यंनैमित्तिकंकुर्यात्काम्यंकर्मनकिं
चन॥आधानंपुनराधानंपशुःसौत्रामणीतथा॥चातुर्मास्यानिसोमश्चैश्च
तथैवाग्रयणक्रिया॥अकाम्यत्वेपिनैतेषांसूतकादिषुनिश्रुतिः॥प्रक्रांतेष्व
पिचैतेषुसूतकादिसमुद्भवे॥कर्तव्यान्येवचैतानिवारितान्यप्यशेषतद्दति॥
चातुर्मास्येषुचवैश्वदेवपर्वणायागेत्सेवरुणप्रघासादिऽनारब्धेष्वपिरजो
दोषादिनिमित्तेजातेतानिकर्मकर्तव्यान्येवेतिधूर्तस्वामिनः॥अनतःप्रारब्ध
स्य॰सूतकरजोदोषादावप्यनुष्ठानेवयुक्तं॥तच्छुद्धिप्रतीक्षणं॥आधानेतु
विशेषः॥अर्वाक्पूर्णप्रदानाच्चेदाधानेस्त्रीरजस्वला॥तच्छुद्धौपुनराधानंमा
त्रपूजनपूर्वकं॥स्यांतातेभ्यरणेत्रियोनिःसेवोत्तेस्तथा॥आधानानंतरव्रतं
चेस्याद्दतियुक्ताकथंचन॥मणिकादिनकर्तव्यंऋषिदेवोब्रवीदिदं॥आधानेपू

२

॥७०४॥

रणादूर्ध्वंनस्यात्तत्रैवसूतकं॥मणिकादिनकर्तव्यंकुर्यादिकादशेहनि॥बोधाय
नमतादेवभरद्वाजमतादपि॥त्रिरात्रांतेरजोदर्शनाच्चतुर्थेहनिस्वक्तकनानं
तंयंगोमूत्रमिश्रेणोदकेनतांरजस्वलांस्नापयित्वावासःपरिधानादिसंनिपत्यो
पकारकं॰कर्मकरोति॥तत्रायंक्रमः॥चतुर्थेहनिसूर्योदयानंतरंरजस्वलायाः
स्नानं॥पश्चाद्गोमूत्रमिश्रेणपदस्थदकेनप्रतिप्रस्थात्कारितंस्नानं॥कालाहुति
होमः॥अनादिष्टंवस्त्रपरिधानं॥उत्तरीयधारणं॥आत्मप्रयादनं॥दीक्षणी
यानभवत्येवसांनिपातिकत्वात्॥कुशास्तरणं॥नवनीतेनाभ्यंजनं॥अभ्यंज
नंपावनं॥अंगुल्यंचनप्रोक्तासांविसर्गात्॥अंगुष्ठतत्सहितयोरुत्सर्गः॥अ
परेणवाधवेशनं॥मेखलाबंधनं॥निवीकरणं॥शिरस्येवेष्टनं॥शंकुबंधनं॥भ्रूव
उपरिललाटोपस्पर्शनं॥नभ्युम्युत्सेखनं॥असांनिपातिकत्वात्॥एवंदीक्षि
तस्याज्ञातिमरणास्पर्शनादिनिमित्तेस्नानउत्पन्नेउदकाभ्यवायंपवित्रेव
स्नानंकृत्वापश्चाद्गोमूत्रमिश्रेणमदस्थदकेनस्नात्वाकालाहुतिपूर्वकंवासः

परिधानादिसांनिपातिकं कर्म कर्त्तव्यं॥ स्रुत्यासुत्वमुष्टिविसर्गांतानां संस्काराणा
मपवृक्तानामपि स्नानानंतरं पुनः करणं भवत्येवेति याज्ञिकाः॥ एवं सोमया
गमध्ये प्रसूतायां पत्न्यां दीक्षारूपाणि निधायेत्यादि सर्वरजस्वलावद्भव
ति॥ अत्र श्रीअनंतयाज्ञिकाः प्राहुः॥ वेदिसमीपे स्रुत्यासु सिकतास्वासनं
तथा योग्याभावादतो नास्त्यास्तिष्ठेदिति विधिस्तथेति॥ ॥५ दीक्षितः सू
नदीक्षितो यजमानः स्वाप्नाध्याय निदितमानिष्टसूतकं स्वप्नं दृष्ट्वा काला
हुति वाचनपूर्वकं पयो वर्त्तेदुःस्वप्न्यादित्यमुं मंत्रं जपति॥ ॥दीक्षितो रेतः
स्कंदने जाते कालाहुतिवाचनपूर्वकं यो मे धपयस इति मंत्रेण स्वानस्य रेत
सउपर्युदकं निनयेत्॥ यदि दीक्षितो नद्यादिस्थामुदकं तरेत्॥ तदा कालाहु
तिवाचनपूर्वकं उदतीर्बल धुन्नेति मंत्रेण तीर्थमणदुदकमभिमंत्रयते॥ य
दि दीक्षितस्योपरि मेघो वर्षति॥ तदापि दतीर्बलमित्यनेनैनेव मंत्रेण शरीर
स्थं वर्षोदकं स्वयमेवाभिमंत्रयते॥ कालाहुतिवाचनपूर्वकं॥ यदि दीक्षितो मेध्यं
भूडास्यया पिष्ठमुत्रपुरीषादिकं पश्यति तदा कालाहुतिवाचने सखाभबधम

न इति मंत्रेण सूर्यमुपतिष्ठते॥ ॥यदि दीक्षितः प्रयत्नपूर्वकं स्वदेहाद्रुधिरं नि
ष्कासयति॥ तदाज्यं संस्कृत्य ब्रह्माहुतिवाचनं करोति॥ ततोऽध्वर्युः स्रुवगृहीतमा
ज्यं जुह्वां गृहीत्वाहवनीयपरिस्तरणसमिधाधानं कृत्वारुद्रियाभ्यामृग्भ्यां स्वाहे
ति जुहुयात्॥ ॥यदि दीक्षितो निष्ठीवेत्॥ मुखादुदकश्लेष्मादि बलान्नु प्रवृत्य नि
रस्येत्॥ तदाहुतिवाचने ब्रह्मा करोति॥ ततोऽध्वर्युः स्रुवगृहीतमाज्यं परिस्त
रणसमिदाधानपूर्वकमाहवनीये बीभत्साभ्योऽद्भ्यः स्वाहेति जुहोति॥ यदि दीक्षि
तोऽसवेदति न्यायेन तूष्णीं गच्छेत्॥ तदा कालाहुतिवाचनानंतरं अध्वर्युः स्रुवगृही
तेन वायवे स्वाहेति आहवनीये कुर्यात्॥ यदि दीक्षितस्य प्रस्वेदे ज्यायते॥ तदा
कालाहुतिवाचनानंतरमध्वर्युः स्रुवगृहीतमाज्यमाहवनीय अद्भ्योऽद्भ्यः स्वाहे
ति जुहुयात्॥ ॥यदि दीक्षितो दिवा स्वपेत् निद्रां कुर्यात्॥ तदा कालाहुतिवाच
नानंतरं अध्वर्युः स्रुवगृहीतमाज्यं प्रजापतये स्वाहेति मंत्रेणाहवनीये जुहोति।
स्मार्तमपि दिवास्वापनिषेधातिक्रमनिमित्तं प्रायश्चित्तमत्र भवति॥ यदि दी
क्षितद्दृष्टवियोगपुत्रमरणादिदुःखनिमित्तमश्रुपातं करोति तदा पूर्वं ब्रह्माका

॥१०६॥

ऽऽहुतिंजुहोति।ततोध्वर्युस्त्रभ्योग्नः स्वाहेतिमंत्रेणसकृद्गृहीतमाज्यमाहवनी
येजुहोति।अत्रव्रातमस्यपिभवतीतिकारिकाकारः॥नेतियाज्ञिकाः॥दीक्षितो
यदावमतितदादुग्धंपीत्वापुनर्वमनंकुर्यात्॥अथवोदकंपीत्वापुनर्वमनंकुर्या
त्।तत्रकालाहुतिपूर्वकमध्वर्युराहवनीयेसकृद्गृहीतमाज्यंबीभत्साभ्योग्नः
स्वाहेतिमंत्रेणजुहुयात्।इदंबीभत्साभ्योग्नः पत्न्या अथ तेषु निमित्तेषु एता
न्येवनैमित्तिकानि दीक्षितत्वाद्विशेषात्।मंत्रवर्जंसूर्योपस्थापनं।सोमच
मसमध्येपक्षिणामत्रपुरीषादिस्रवणेसतेकालाहुतिः।वाचनंचा।ततोध्वर्युः
संस्रुतमाज्यंसकृद्गृहीतमंतरिक्षेणप॥ततोमंत्रेणाहवनीयेजुहोतिइदम
ग्नये।ततोदुष्टस्यचमसोत्तरेपूर्वेशानदिग्भ्रिउपरवेहोमः॥प्रजापतयेस्वा
हेतिमंत्रेणततस्यचमसस्यपुनरुन्नयनं।अभ्युपावृतानभ्युपावृतचम
समात्रसाधारणमिदंप्रायश्चित्तं॥ ॥नाराशंसेतव्यतिरिक्तेवाचमसेअ
भक्षितेसदसोमध्यादनिष्क्रांतेचयदास्तोत्रस्योपाकरणंभ्रांत्याज्ञाने
नोवाक्रियतेतदाचमसोस्यपावृतइत्युच्यतेतदापूर्वकालाहुतिहोमोवा

॥१०६॥

चनंचा।ततोभ्युपावृतचमसमुत्संगेनिधायाध्वर्युराहवनीयसमिदाधानपू
र्वसकृद्गृहीतेनाज्येनाहुतिंजुहुयादग्नआयाहिवीतयेइतिमंत्रेणइदमग्न
ये।आज्येनाभ्युपावृतस्यजुहुयादितितांघ्रब्राह्मणश्रवणात्।तथाचशांखा
यनः॥हिरण्यगर्भइत्यपावृतेजुहुयादवस्थाच्चनिर्हरेतिदिति।तेनाभ्यु
पावृतस्येचसमस्यसदसोनिःकारानमुत्तरीयेणानेनबाच्छाद्यकार्याअ
धवाभ्युपावृतंचमसमुत्संगेनिधायाध्वर्युर्हिरण्यगर्भःसमवर्तताग्रइत्य
चाग्नीध्रीयेसकृद्गृहीतेनाज्येनसमिदाधानपूर्वकामाहुतिंजुहुयात्॥
इदंप्रजापतयेकस्मैइतिवा।तथाचएतिकाकायनीयानामध्वर्यूणांसूत्रे
यस्यचमसोभ्युपावृतःस्यात्तमेनमुत्तरसिचावच्छाद्यपूर्वयाद्वारासदसो
पनिर्हृत्यपुरस्तादाग्नीध्रीयस्यनिधायाज्यंजुहुयादिति।तथाचसूत्रांतरे॥
आज्येनाभ्युपावृतस्यजुहुयादित्युक्तेविमन्येदाज्याहुतेरेवप्रतीत्यामिति
ततोभ्युपावृतस्यचमसस्यभक्षणंततआप्यायमनोराशंसश्चेत्।अन्यश्चेत्प्र
क्षालनमितियथाविहितंकुर्यात्।तथाचलौगाक्षिसूत्रं।सदस्यभ्युपावृतेच

॥१०८॥ मसेरिक्ते हिरण्यगर्भ इतिद्वाभ्यांजुहुयादितिमानवेचासदसिवेचमसमभ्य
पाकुर्याद्धिरण्यगर्भ इत्याग्नीध्रीये पूर्णाहुतिंजुहुयादिति॥ ॥ इंतस्यसो
मस्यग्रहचमसादिस्थस्याभक्षितस्येजुहुतेनसोमेनसहसंसर्गेजातेतत्का
लमेवकालाहुतिवाचनेकृत्वा आहवनीयाग्नेः सकाशादेकंपुष्कलाङ्गारंहित्वं
अंगारहोमसमर्थंदक्षिणस्यांदिशिपरिधीनांमध्येतत्समीपएवपृथक्कृ
त्वानिधायदर्भतृणेनग्रहचमसादिस्थंतंसंसृष्टसोमातसिस्रुवग्रहंतेंगो
रध्वर्युर्जुहोतिहुतस्यचाहुतस्येतमन्त्रेणइदमिन्द्राग्निभ्यां तत्रएव
मेवचुल्कुतेस्वाहेतिद्वितीयामाहुतिंजुहोति। इदंचुक्रते। तस्यसंसृष्टसोमस्य
देवभक्षणंयथाधिकारं। प्रायश्चित्तहोमकर्तृत्वादध्वर्योश्चतत्रभक्षण
मंत्रविशेषःमायज्ञमानंतमोविदन्निति। ततः संसृष्टस्यग्रहचमसादेर्य
थाविहितंग्रहणमुत्रयनवाकार्यंहुताहुतौसोमौपीनापीनौवासंगृह्येया
तायत्तस्यहिस्थ इतिद्वाभ्यांवहिष्परिध्यंगारेशिषंनिनयेदितिकाःके।

॥१०८॥

~~सं~~ तथामानवसूत्रे। यदिहुताहुतौवासोमोवासोमोवासंसृज्येयातांमतःप
रिध्यंगारान्दक्षिणायोह्य्यहुतस्येतिजुहुयादिति। नाराशंसेषुविशेषःशांख
यने॥ अभ्युन्नीतंनाराशंसंहुताहुतस्येन्द्रपतमित्यंतःपरिधिभस्मनिजु
होतिभस्मनिहोमोविहितः॥ होमाभिषवनिमित्तसाकर्षाः मिश्रःसोमवृष्ट
इत्युच्यते॥ तस्मात्तादध्वर्योर्नाराशंसस्यापिभक्षणंवाचनात्तु॥ यदाग्रहचम
साविस्थसोमस्यापरिसोमोवर्षतिसवर्षाबिंदुमिश्रःसोमोवृष्टइत्युच्यते॥
तस्यदुष्टत्वात्तेनैवविहितंयथा। प्राकृतयागंकृत्वास्वावसरएवतस्यावृ
ष्टस्यसोमस्यभक्षणंइंदुरिंदुमवगादित्यनेनमंत्रेणयागात्पूर्वमेवकालाहु
तिवाचनेभवतः॥ मंत्रांतरोपदेशात्प्राकृतस्यभक्षमंत्रस्यनिवृत्तिःप्रति
सवनंभक्षमंत्रेविशेषः॥ इंदुरिंदुमयागात्स्ययावतोगायत्रछंदःसर्व
गणस्येतितृतीयसवनं॥ सर्वेषुसवनेषुआद्यछंदःसछंदःशब्दवर्जितंइंदु
रितिअवृष्टसोमस्यभक्षणमंत्रकेचित्पठंति॥ इंदुरिंदुमइंद्रियावतः

सर्वगणस्यान्यवं॥ ॥यदि चमसस्थः सोमः स्कंदति तदा कालाहुतिः वाचनं च॥
ततो भूस्यां दोस्कन्नस्य सोमस्यास्कन्नमभ्यर्जन्यं इत्यालंभं अध्वर्युः करोति॥
ततो भूस्यादोस्कन्नस्य सोमस्यास्कन्नमभ्यर्जन्यं इत्यालंभं अध्वर्युः करोति॥
यद्यच्चमसस्थः सोमोऽमेध्ययातश्वाद्यवघ्राणादिना दुष्टो भवति तदा काला
हुतिवाचनेन स्रुत्वा तं चमसस्थं सोमं उत्तरपूर्वेशान दिक्संस्थे उपरवे प्रजापत
येस्वाहेति मंत्रेणाध्वर्युर्जुहोति॥ तद्वै सोममात्रस्यादुष्टस्याच होम उक्तः॥
प्रजापतये स्वाहेति मंत्रेणाध्वर्युर्जुहोति॥ ताद्वै सोममात्रस्य दुष्टस्यात्र हो
म उक्तः॥ प्रजापतये स्वाहेत्यभक्षीयस्य जुहुयादुत्तरपूर्वार्द्धे उपरवे इति॥ का
ठके च॥ हविर्दुष्टमयो वनये सोमं दुष्टं मनसा प्रजापतये स्वाहेत्यभक्षणायानु
परवे ष्ठनये दिति दुष्टस्य वसुनरुच्चयनं कार्यं यत्र होमो धिषवणफलके दुष्य
कार्यः काठके दर्शनात्॥ अथ यन्वमस व्यतिरिक्ताः सर्वे ग्रहादि स्थाः सोमा भवं
ति॥ तान्दुष्टानग्नये स्वाहेति मंत्रेणाध्वर्युर्ग्रहासादनार्थे खरे जुहुयात्॥ अत्रा
पि पूर्वं कालाहुतिवाचने भवत एव॥ ततो यथा विहितं तेषां विनष्टानां सोमानां
पुनः संपादनं कार्यं॥ यदि नाराशंसभ्रमसः शुष्यति। तदा कालाहुतिवाचनपू

कं आग्रहणात्॥ उन्नयकार्यं॥ तदुक्तं श्रौते सत्य यदि राजोपदस्येत्तमत एव तन्वीरन्
यदि राजा सोमग्रहेषु चमसादो वाउपदस्येदुपक्षीणो स्योभवेत्॥ तमत आग्रय
णादेवतन्वीरन्वर्द्धयेयुः विस्तारयेयुः कार्यसमर्थं कुर्युः॥ सूत्रे प्युक्तं॥ सावित्रि
पात्नीवत हारियोजनीपक्षीणानाग्रयणादिति अथवा अन्यात्मग्रहात्॥ शुक्र
नाराशंसमपि भवान्गृहीतादैन्द्राग्नवैश्वदेवमरुत्वतीयमाहेन्द्रमहोवैश्वदेवा
नामन्यतमस्मात्समीपवर्तिनाग्रहात्गृहस्तोमानंतरं रक्तकं सोमं शुक्रे नाराशंस
चमसे आसिच्य भक्षयेयुः॥ तथा च सूत्रांतरं॥ यदि नाराशंसस्तउपदस्येच्चमध्वर्युः॥
पूर्वं ग्रहं गृहीयात्तं वषट्कर्तानुवषट्करते हुत्वा चमसाध्वर्यवे प्रयच्छेत्तेन
नेसभाप्यायतीति॥ तथा च मानवे॥ यदि नाराशंसा उदस्ये युर्पयं ग्रहमुपति
ष्टेरस्तस्य तस्य बिंदुमवनयदिति॥ तथा च काठके॥ नाराशंसे सर्वस्कंदनेय
मनु भक्षयंति तं मरुते चात्रे गृहीत्वा प्रचर्य भक्षयित्वाप्यायये दुग्धे शाचैज्ज
गुप्सीतामायासेकनासिच्य भक्षयित्वाप्याययेद्यदि वह वो नाराशंसाः सर्वस्क
न्नांस्युरेवमेव कुर्यादिति॥ आश्वलायनोपि॥ उपदस्ते नाराशंसे यंजपन्येग्र

॥७०१॥ हं गृह्णीयात्तस्य कुतस्यात्मक भवनयेति॥ यथा नाः पाथ्वान्याः नाराशंसश्चो
षणात्पूर्वं गृहीतः अमध्वर्युरिति कुतस्य तस्या मित्यस्य मिति निदानसूत्रं॥
॥ यदि द्रोणकलशः शुष्यति। उपजीर्णो न्यो भवति तदा कालाकृतिवाचनेन
ता एके द्रोणकलशमध्ये दुग्धमासिंचन्ति। तदा कुः पयो वनयेदिति। ताण्ड्यश्रुते
ता॥ अथवा हिरण्यं द्रोणकलशे वधाय त्वोदकमवनयेत्॥ तथा च छंदोगसूत्रं॥
हिरण्यं द्रोणकलशेवधायतत्रापोभ्यनवपेयुर्हिरण्यमेव चमसेष्ववध्याय
नेष्वयोभ्यवनयेयुरिति। अत्र काठके विशेषः॥ ॥ द्रोणकलशाउपस्थआग्र
यणात्सुयेमाहुभ्य हिरण्यमंतर्ज्ञायामि पूतभृतो हिरण्यं मंतर्ज्ञाय ग्रहानुन्नय
दिति हिरण्यवद्धोदकमिति वा। सद्यो द्राग्रयणात्पूतभृतो चेति वासुदेवः॥ पू
तभृति सोमस्याभावे प्येवमेव दुग्धो मेकं हिरण्यमवधायोदकासेकं वा
तेन यथाविहितं सोमं कार्यं कुर्यात्॥ अत्रापि पूर्वकालाकृतिवाचनेभव
तः॥ अत्र मानवसूत्रे विशेषः॥ यद्याग्रयणः स्कंदेउपवादेस्येपुराग्रयणाच्छ्रि

॥७०१॥

गृह्णीयाद्द्रोणकलशे चन्नविंदेत्पूतभृति वा हिरण्यमजीषेभ्यस्यामि श्रृणु
याद्धिरण्यमप्सु प्रत्ये हिरण्येनसह जुहुयादिति॥ तथा काठके॥ ग्रहानुपस्ताना
ग्रयणाद्गृह्णीयाद्गृहेभ्यो वाग्रयणं सर्वस्कंदे नष्टे दुष्टे वा पुनः संस्करणमनादे
शादिति। क्षीणामाग्रहणं प्रोक्तमाग्रयणात् पुनः सत्तु क्षीणात्सृजीषादुत्सन्नो भिष
वास्तीति ततः ऋजीषो पि विनष्टश्चेत्सत्रिकादितदाश्रयेत्॥ ग्रहणमयं हिंकारका
लापेक्षाच्च देवताइतियाज्ञिकाः॥ अन्यत्राग्रयणाच्छ्रीणाः श्रुतेः सपदि नत्रहि॥
ऋजीषो विद्यते यादुत्साद्यः सांनिपातिके॥ पूतिकावसरः कर्हि यदृजीषो न
विद्यते। हिंकारादिनकर्तव्यं वाग्यमाभावतः श्रुतेः॥ आदिष्टदेवता कार्यसाद
नं सुकृतं भृणु॥ इति वासुदेवः॥ द्रोणकलशस्य सर्वस्कंदने दोषादोत्सनादिष्ट
कृत आधवनीयात्सोममादाय दशापवित्रेण सात्वयित्वा तमर्द्धपूर्णं कुर्यात्॥
आधवनीयसोमाभावे पूतभृत्सोममादायपावपि षेवार्द्धपूर्णं कुर्यात्॥ दोष
नु दुष्टस्य होहो ग्नयवैश्वानराय स्वाहेति आधवनीयसोमस्य नाशादोषादोभ
नाविर्द्धं हुत्वानभि तं सोममादाय ऋषांतरेणाधिषवने प्रक्षिप्य वसजीवर्या

नामकदेशदोषदादभादिषुंस्त्वाधवनीयसोमात्पूर्ववद्यथासंभवमाग्रयणंग्र
ण्हीयात्॥आहवनीयसोमस्याभावेपूतभृत्सोमात्तदभावेपूतभृत्सोमस्याभावेदुद
कंसाग्निश्चकृजीषाभृतासोमात्पूर्ववद्यथासंभवमाग्रयणंगृहीत्वाप्ररतंकर्म
कुर्यात्॥ऐन्द्रवायवादिग्रहसोमानांनाददोषादिष्टप्रवर्तयतः॥सोमोत्तेषांपूर्व
ग्रहणंस्तमभूत्ततएवयथासंभवंग्रहणंस्त्वाप्रावृत्तंकर्मकुर्यात्॥तस्याभाव
नुपूतभृत्सोमात्तस्याभावेआग्रयणसोमात्नाराशंसयतिरिक्तानांदुष्टानां
सोमानांपरेहोमः॥सर्वत्रसोमानानाभन्याभावेआग्रयणदाप्यायनं।उपक्षीणा
नाग्रयणादितिसूत्रात्।पूतभृत्सोमस्यनाशदोषावनादिष्टस्त्वाआधवनीयसोमा
नाशावसंपाद्यपूतभृत्यतिपावयित्वातेनप्रावृत्तंकर्मकुर्यादितिगदाधरः॥ध्रुवा
वनयवविस्मरणेकठसूत्रेप्रायश्चित्तं॥ध्रुवंचेत्प्राप्तकालेनावनयेत्सुनयेन्नाय
न्नीयमुपाकुर्याद्ज्ञातांचेन्नकामयन्तहोमांतरंब्रूयाघंसेवस्तोत्रीयांपरिधा
नीयांचैतितंत्रतचैवमवनयेत्तवहनिचेत्सुनस्तोत्राणिसमनीतानिस्युरेवमेवकु

र्यादिति॥तथासंवत्सरून्नेनष्टदुष्टेवायथापूर्वपुनःसंस्कारेणमनादेशात्इतिसर्वग्र
हचमसादिसाधारण्येनोक्तं॥कठसूत्रेविशेषः॥यदिध्रुवःस्कंदेत्सुनःप्रवर्त
यद्द्रप्सुदशसीत्यभिमंत्र्यवरंदत्वावस्थापयेद्घघूपसत्स्वाहादिवआप्याय
स्वेतिपर्यायैःस्त्रिसोममभीचाथवर्हितमानवा।प्रातःसवनेमाध्यंदिनेवास्तु
क्काभिषवेवा॥भिषेचेक्रियमाणेद्विभेदनेग्रावहोमेभेदनेमरुद्देवताकेनब्रह्म
स्तोत्रान्नातारःसुवीरन्॥ब्रह्मसामचमाध्यंदिनेआह्वणंपसिविहस्तोत्रे॥ ॥
एकस्यग्रावहोमेभेदनेद्वयोर्बहूनांवाउभयोर्वासवनयोर्भेदनेपिएकमेवप्रा
यश्चित्तंभवतिनप्रत्यग्रावभेदेकुतःअथवेदनेकोग्रावावाविशीयेतपूर्वस्मि
न्वाभिषवेपिद्वाभयोर्वासर्पणयोःप्रतिहन्तविच्छिद्यतयूपेक्कादन्वीभ्यांवा
यूपेनेकोविरोहेसवनसूत्तंप्रायश्चित्तंविभवेदितिघदोगसूत्रात्।तथा
एतेनब्रह्मणःप्रायश्चित्तंव्याख्यातंसवनसूत्तमेवविभवेदिति।तेनानेक
ग्रावभेदाच्चपिचतुस्त्रिशाग्रोमेकालाद्कुर्यादिसन्नदेवभवति।प्राक्लिंगी

षेन्यं प्रयुज्योद्रात्रक्र्याद्युतानस्त्रामारूतस्यभारूतस्यब्रह्मनाम्नाध्वमितिका
दके॥ शांखायनश्च॥ग्नोक्तिर्दाणेष्वितस्यताश्वसर्पादीषमाणाइतिदुमास्तु
वुतुर्यदिमाध्यंदिनतृतीयसवनेमुख्वाभवद्गति॥अद्भिभेदतास्मिन्नेवकाले
अग्नीध्रीयप्रथमंकालाहुतिवाच्चने॥ततः परमेष्ठिनेस्वाहेस्याद्याश्वतुस्त्रिं
शदाहुतिरध्वर्युर्जुहोति॥आहवनीये॥ततउन्नातारः स्वावसरेमारुतेनब्र
ह्मसाम्नास्तुवीरन्॥ ॥केनचिच्छत्रुणासोमापहरणेकृतेविधावतेछेतंति
रभानंतरंकृतदीक्षस्यसोमायहरेत्तदुपादानोपदेशात्सोमलाभपर्यंतंदी
क्षितएवससोमाभिषवमध्वर्युर्ब्रूयोत्॥यजमानपुरुषान्प्रति॥हेपुरुषाः पर्यवि
धावविविधन्वरयागघृतरछनेगवेषयतस्योममितिप्रैषार्थः॥अत्रपूर्व
माग्नीध्रीयकालाहुतिहोमः॥वाचनंचाप्यत्रतोघ्रब्राह्मणे॥यदिसोमक्रीत
मपहरेयुरन्यः क्रेतव्योयदिक्रीतंयोन्योभ्याशःस्यात्तस्माहृत्यः सोमविक्र
यिणेप्युकिंचिदद्यादिति॥एवंचारंभानंतरंकृतदीक्षस्यसोमायस्वाहाहेउ
पादानोदेशात्सोमलाभपर्यंतंदीक्षितएवससोमाभिषवंकरोतीत्यर्थः॥दीक्षा

वर्द्धते॥अस्मिन्नर्थेउपग्रंथकृताश्रुतिरपिदर्शिता॥दीक्षितआगमयत्नो
कोमलाभादपिगिरिधावेयुरित्यपिश्राद्यायतिब्राह्मणंभवतीति॥एवंता
वदक्रीतेप्रहृतेसोमांतरमेवग्राह्यंतान्यस्त्रायश्चित्तं॥अथयदिकदाचिक्री
तेनिर्वृत्तक्रयेसोममपहरेयुरितिसंबंधः॥तदायुकश्चिदन्यसोमउपात्तरो
षोवाअन्योवायोन्यासंसेनिरूढः भूपादानः स्योन्नोपसदोविवृद्धिंपूर्ववच
नयेत्सआहून्यआहरणीयः॥क्रयेनेरपेक्ष्येणस्वीकार्यएव॥क्रतुपेका
रायहिक्रयापूर्वमित्युक्तं॥सचनिर्वृत्तएव॥किंतुसोमानंतरंनिकटदेशात्स्य
माहृत्यसोमविक्रयिष्टोतुप्रास्तानायेवकिंचिदद्यान्नक्रयणद्रव्यंगवादि
कमितिमाधवाचार्याः॥शांखायनभाष्यकृतश्च॥एवंचनिमित्तिकभूतमि
दंकिंचिदानं॥इतिश्रुत्यर्थः॥एवंसंनिकृष्टस्यसोमस्यालाभेपूतिकादि
विधिरितिजयस्वामिनः॥विवतेच्छनिप्रैषितेः सर्वत्रान्विष्यमाणस्यसो
मस्यादर्शनेअलाभेअप्रातोअरुणपुष्पाणिअव्यक्तरागपुष्पाणिगौर
पुष्पाणिअर्जुनानितृणान्यभिषुणुयात्॥अभिपूर्वकंसोमकार्यंविनियु
जीतरायंबालतृणंघासोयवत्तृणमर्जुनमित्यभिधानादर्जुनशब्दस्तृण

वाचीनतथाऽर्जुनस्य तृणाख्याच दिश्यते च । अर्जुनानामभावे रोहितेन हृत
मभिषुणुयात् ॥ खदिरादेर्वृक्षस्य बकुकालीनस्यैव छौरूपायेकुराडस्य
वृंते तच्छ्येनहृतमिस्कच्यते ॥ श्येनहृतस्यालाभे पूतिकानभिषुणुयात् ॥
पूतिकारोहिषात्तृणानि । पूतिकानामभावेऽरुणदूर्वाभिन्यदूरागादुर्वा
अभिषुणुयात् ॥ अरुणदूर्वानामभावे हरितकुशान् । अस्तु ष्टान्दर्भा
नभिषुणुयात् ॥ एवं तन्निधौ वृपात्तसंस्कृते पि यदि सोमः प्राप्यते तदा सो
म्यमेवाभिषुणुयात् ॥ तथा च सूत्रं ॥ नच्छेदनं भिषुते परोक्षे प्रत्यक्षोधिगम्ये
तत्र घृ सर्वे प्रायश्चित्तमेव स्यादिति । अत्रापि मुख्येन क्रियाप्राप्यमकात्स्न्य
का अभिषुते पि प्रतिनिधौ यदि मुख्यं प्राप्यते तदोत्तरस्मिन्नभिषवकाले
मुख्याभिषव एकार्थस्तदेतदाह मख्यन्वधिगमनं तादेव प्रत्यक्षं प्रयुंजी
तान भिषुतश्चेत्परोक्षः स्याद्वधुवाऽभिषुतउत्तरस्मिन्नभिषवका
ले भिषुणुयुरप्युपरोक्षमपो वाऽभ्येष्येवहरेयुः सकृदेव चासर्वमभिषुणुयु
रिति । अपहृते सोमे प्रतिनिधिरयं प्रस्थानान्तरे तु सोमालाभे प्रतिनिधि

मात्रे सोमाभावे पूतिकानभिषुणुयादिति सामान्योक्तेः ॥ दुष्टे तु दुष्टस्य परित्या
गः अपहृतवत्तु कर्म कर्तव्यं ॥ अत्र शांखायनः ॥ क्रीते सोमे पहृते निनयकालम
न्यमाहृत्याभिषुणुयात् सोमाहारायसोमविक्रयिणे वा किंचिद्दद्यादनधिगम्य
माने पूतीकान्नश्वेतपुष्पाण्यर्जुनानि कुशान्वाभिषुत्य यजेत प्रतिदुहा प्रातः स
वने श्रीणीयाच्छृतेन माध्यंदिने दध्ना तृतीयसवने इति । तथा । यदि राजानमप
हरेयुर्नेदिदिशि सोमः स्यात्तमभिषुयात्सोमविक्रयिणे किंचिद्दद्याद्यदि सोमं
न विद्येत पूतीकानभिषुणुयाद्यदि न पूतिका तथार्जुनानि रोहितस्तूलानि हे
मवत्तस्य स्थाने बभ्रूतूलानि मौजयत्तौ यदि नार्जुनान्यथयाः काश्च रणाउष
धार भिषुणुयात्प्रति । दुहा प्रातःसवने सोमान् श्रीणाति शृतेन माध्यंदिने दध्ना
तृतीयसवन इति मानवो । प्रतिधुक्प्रातः पूतिकाश्च । शृतं च माध्यंदिने पूति
काश्च दधि चापराह्णे पूतिकाश्चेति तांड्ये । अतस्तु पूतिकाद्युपादाने प्रतिदु
गादिना श्रयणमवश्यं कार्यं ॥ अभिषुण्वन्वेदेन्मंत्रे सोमशब्दप्रयोगः ॥ अर्जु
नादेः क्रमादित्स्यादुपावहरणं कतवमिति कारिकायां ॥ यस्मिन्यागे सोमह

॥११॥

॥११२॥

नःतस्मिन्एकांगांदक्षिणांदत्वातंयज्ञंसमाप्यावभृथांतंकृत्वापुनर्यज्ञःपुनरन्यःस
दक्षिणःसएवयज्ञःकर्त्तव्यः॥अत्रचगोरेवसंख्यासंबंधेः।ततश्चहिरण्यवा
सोमश्चदीनामयाधातेषांदातमत्तभवत्येव।गवांज्ञातस्यस्थानेरिकागौः।अत्र
वदक्षिणाभिमंत्रणे[struck out]होमः॥रूपेणवारूपमभ्यागांतुयोवोविश्व
वेदाविभजतु॥ऋतस्यपथाप्रेतचंद्रदक्षिणाइतिअत्रकारिकायां॥उदसावे
भूधादन्यसमिदं।तस्सुनश्चनतत्रयदुत्तरावयुपसोमप्रणीतकाः।पूर्णपात्री
दियत्किंचिद्दीयतेतत्तदेवतु।असुहिकर्तव्योबर्हिरादीपनांतकइति।हरि
स्वामिनोपितस्मिन्नेवदेवयजनेप्रातःसदोहविर्धानिमाग्नीध्रीयादाविसृत
वान्।अथखलुसत्रेभ्योमपेआत्रदाक्षिण्यंसायप्रायश्चित्तमामांगाचलोपे
नवक्षिपश्वामःककुद्यानिहविवतमर्थंसादयंतीत्यादिनासिद्धांतमुपपद्दुरुय
नत्रसर्वप्रायश्चित्तमेवभवति।तथाऽत्रैवसूत्रे।तच्चेत्तृतीयसवनात्सोम
मपहरेयुरितिप्रक्रम्यऋजीषाभिषवोवाकार्यः।सनिर्वापूतभृत्तियोवाहि
रण्योदकंवाप्रतिनिदध्यादथतदप्यहृतंतदात्तृतीयसवनेपिपुनरन्यः॥सो

॥११२॥

माभिषवःकार्योन्यथायागलोपापत्तेरिति॥अत्रपुनर्यत्तवचना[illegible]नदेवास्मि
न्पुनःप्रयोगेतदध्याद्यन्यूर्वस्मिंदास्यस्यादितिहरिस्वामिनः॥अवभृथोदुहे
त्सुनहीक्षितत्त्वेनहध्यास्यस्यादितितांघ्रेश्रवणात्॥द्रोणकलशभेदेको
ल्लाहुतिर्वाचिनेच।स्कंदनंप्रायश्चित्तं॥ततोस्वकालेवटकारनिधानंब्रह्मसा
मकर्तव्यं॥अवपृक्तारोवाएषहोमःपरासिच्यतइतितांघ्रेश्रवणात्सोमाव
भ्रयणपर्यंतहरणेप्रायश्चित्तं॥तदहरणमात्रे।सोमावस्रवणदर्शनकाल
एवाध्वर्युः॥प्रतिप्रस्थात्रादीन्प्रेष्यतितृन्नुतुलिसध्वमित्येषः॥अनुलुब्ध
प्रासुंग्रहीतुमिच्छेतेतिप्रैषार्थः॥कलशोद्रोणकलशइतिहरिस्वामिकर्त
कारिकारश्च॥कलशशब्देनवसतीचरीणांकलशःएवगृह्यतेतेनद्रोणकल
शइतियोत्तिकावासुदेवभट्टाश्च॥ततस्तेप्रतिप्रस्थात्रादयोध्वर्युणाप्रेषि
ताःसोमंगवेषयंतोधिषवणचर्मणिपतितंयस्वरिमाणंप्रस्कन्नमात्रंवा
अंजलिमात्रंवासोमंलभेततावन्मात्रंसोमनेकधनेस्थेऽर्जखैरायाप्यप्रभा

॥११५॥ चयंतःसर्वेषुद्रोणकलशसोमभेधिषवणैस्तोकमेपिनलभेरन्नूनंतदाआ
ग्रयणात्सोमंगृहीत्वातमेकंधनसंबंधिकार्येषुप्रापयंतःसर्वेद्रोणकलश
सोमकार्यंतेनकुर्युः॥यदिग्रहस्थाश्चेद्यो द्रोणकलशसोममधिषवणैस्तोक
मपिनलभेरन्नूनंतदाआग्रयणात्सोमंगृहीत्वातमेकंधनस्थेजलैरभ्युन्नी
यप्रभावयंतप्रचरेयुः॥अत्रद्रोणकलशकार्यक्षमेजातेद्रोणकलशांतसंपा
घृतस्मिन्नुतनद्रोणकलशेआग्रयणस्थान्येवाकत्स्नंसोमंनिनीयेकंधनस्थे
जलैस्तस्याप्यायनंकृत्वाद्रोणकलशसोमकार्याणिकुर्युः॥अत्रमानवेविशे
षः॥यदिप्रातःसवनेकलशोदीर्येनवषट्काराणिधनंब्रह्मसामकुर्याद्यदिमा
ध्यंदिनेथायंतीयंब्रह्मसामकुर्याद्यदितृतीयसवनेचारवंतीयमग्निष्टोमसा
मकुर्यादिति॥इदंद्रोणकलशस्यभिदेप्रायश्चित्तं॥वसतीवरीकलशभेदेतु
कालाहुतिवाचनेकृत्वानाशादोषापहारादिषुप्येवं॥पात्रदोषाभावेतेनैव
ग्रहणं॥पात्रदोषेत्वन्यस्मात्समुपादेयंपात्रभेदेतुभूमिर्भूमिमवागादित्य
भिमर्शनंच॥पूतभृदाधवनीयाहस्थान्यादिमन्मयभेदेतुकालाहुतिवा ॥११५॥

त्ति
चनाभिमर्शनोंभवंति॥दक्षिणादानादुत्तरकालंकलशभेदनेएतत्प्रायश्चि
त्तमुक्तं॥दक्षिणादानात्प्राक्कलशभेदनेतुएकांगांदत्वाअवभृथात्एवपुन
र्यज्ञोभवति॥वरणादिआदिप्रवेशानांतः॥नीतास्वृत्विक्कलशोदीर्णेपुनर्यज्ञ॥
स्यादेवअपरेष्वपिनिमित्तेष्वेवमेवेतिहरिस्वामिनः॥अत्राहकारिकाकारः॥
दिर्घेतदक्षिणादानात्प्राग्द्रोणकलशोयदि॥सोमापहारवत्तत्रपुनरावृत्
तेंकुर्वं॥निर्घेतदक्षिणादानात्ऊत्तरंकलशस्तदा॥ब्राह्मणाछंसिनःस्तो
त्रेवर्षाग्निधनमाचरेत्॥इति॥अथसोमातिरेकेप्रायश्चित्तमुच्यते॥ ॥
यदिप्रातःसवनादधावाकोविग्रहचमसोन्नयनानानंतरंपूतभृतिसोमो
पा तिरिक्तोवशिष्टोदृश्येत॥तदाँवाक्सुस्थ्याविग्रहस्यपात्रप्रक्षालनांतेकृतेका
लाहुतिवाचनेकृत्वातमतिरिक्तंसर्वमपिसोमंहोतृचमसमुख्येषुद्वादशसु
चमसेषून्नीयतृणाभ्यांहोतृचमसमुपस्पृश्ययउपावर्त्तध्वमित्यस्मिन्नेव
मंत्रेणस्तोत्रोपाकरणमध्वर्युःकरोति॥उपाकरणानंतरमुद्गातारोस्मि
सोमोस्मिन्नयंसुनरित्यादिकासुगायत्रीछंदस्कासुमरुत्वतीषु सु

॥११५॥ गायत्रेण साम्नास्तुवीरन्नायदि प्रातःसवनात्सोमो निरिच्येनास्तिसोमो
अयंसुतइतिमस्यतीगायत्रेणेस्तुपुरिनितांघ्रश्रवणात्॥ तथा यदि सो
मेतितिरिच्येन होतृचमसमुख्यानुन्नीय स्तोत्रमुपाकरोति ऐन्द्रावैच्छ
वंहोतानुशंसंति यदि प्रातःसवनास्तिसोमो अयंसुतइतिमरुत्वतीषु
गायत्रेणस्तुपुरितिमानवे॥ एतत्सोत्राननंतरमैन्द्रावैच्छवंहोतानुशंस
ति। यस्मान्निरूढत्तंचदक्षादिः सोमानसोमेतिरिच्यते॥ अच्छावाकोक्थ्युर्या
न्निरूढदादिस्तोमो भवतिस एव प्रायश्चित्तार्थस्तोत्रेपि कार्यः॥ एवं माध्यं
दिनेसवनेपि सोमातिरेक निमित्तेउ विग्रहस्तोम एव सोमातिरेव
स्तोत्रे कार्यः॥ एवंतृतीयसवनेपि सोमातिरेकेयदंत्यस्तोत्रंभवति अग्नि
ष्टोमचमसास्तुक्षोडशीवा अच्छावाकोक्थ्यं वा षोडशीस्तोत्रंवा वाजपेया
तिरिक्तस्तोत्रंवासंधिस्तोत्रंवा अप्तोर्यामान्यपर्यायासएवातृधूत्सषुयः
सोमोभवति सोमातिरेकनिमित्तस्तोत्रेपिसएव कार्यः॥ तदंते होतृचम
समादायाध्वर्युरुच्छयत्रायजसोमानामिति होतारंप्रेष्य वषट्कारजुहोति॥ ॥११५॥

चमसाध्वर्यवश्चजुह्वति। इदमिंद्राविष्णुभ्यामिदमग्नयइति त्यागोयथा
विहितंभक्षणंच। यदि माध्यंदिनसवनांतेमेस्व्यचमसोन्नयनानंतरंपू
तभृतिसोमातिरिच्येतं दाशृर्ववद्धोतृचमसादिषुदशास्तुचमपूतमतिरिक्तं
सर्वमपिसोममुत्तरीयतृणाभ्यां होतृचमसमुपस्पृश्यापावर्त्तद्धस्यनेनैव
मंत्रेणोपाकरणंकर्त्तव्यं॥ ततउन्नातारोबण्महाँ असीत्याद्यासुबृहतीषु
दस्कास्वादिस्वराबृवताष्टजुंगोरीवीतेनगुरुवीतिनावृषिणादृष्टेनसा
म्नास्तुवीरन्नूहोतानुपूर्वदैन्द्रावैष्णवंमवृशंसति। तदंतेहोतृचमसमादाया
ध्वर्युरुत्थायात्रायजसोमानामितिहोतारंप्रेष्य वषट्कारानुवषट्कारयोर्जुहो
तिचमसाध्वर्यवश्चजुह्वति। इदमिन्द्राग्निविष्णुभ्यामिदमग्नयइतित्यागो।
यदि तृतीयसवनेस्तोत्रचमसोन्नयनानंतरंपूतभृतिसोमावशिष्यते
तदानंसोमंहोतृचमसप्रभृतिषुदशासुचमसेषून्नीयतृणाभ्यां होतृच
मसमुपस्पृश्योपावृत्तश्रुध्वेमित्यनेनैवमंत्रेणस्तोत्रोपाकरणंकुर्यात्
तृ॥ उन्नातारश्चविष्णोर्देवतायाः प्रतिपादिकाऋचः त्रिपिविष्टराबृव

स्यभ्वतासुक्षु यज्ञेरीवीतंतेन साम्नास्तुवीरन्॥ हेतुश्च विशेषात्तुपदेशादे
न्द्रावैष्णवमैवायागस्यागादिपूर्ववत्सर्वं एतस्य प्रायश्चित्तं कृत्वा प्रारब्धं क
र्म कुर्यात्॥ अथ तृतीयसवने सोमातिरेके अग्निष्टोमादिषु पृथक्करस्व प्रेक
रूक्तं प्रायश्चित्तमुच्यते॥ अथवा अग्निष्टोमसंस्थक्रतुं प्रारब्धेपि यदि तृती
यसवने यज्ञायज्ञियचमसोन्नयनानंतरं पूतभृति सोमातिरिच्यते॥ त
दा पूतिभृति एवास्यात्या मुयामगृहीतासीन्द्राय त्वा बृहद्वत इति मंत्रेणो
क्थ्यं गृहीत्वा खरे सादयित्वा ततउक्थ्यं विग्रहणं कार्यं॥ इंद्रावरुणाभ्यामि
न्द्राबृहस्पतिभ्यामिन्द्राविष्णुभ्यामित्यनेन प्रकारेण विग्रहणत्रयं कुर्या
त्॥ यद्यल्पः सोमोतिरिक्तो भवेत्॥ तदा प्रागुक्तमेव कुर्यात्॥ बहुश्चे
दुक्थ्यविग्रहपक्षं कुर्यात्॥ उक्थ्यहविग्रहमात्रे एवारचयेदंशादशे चम
सा यात॥ तन्नातिरिक्तः सर्वः सोम उपयुज्येत इत्यभिप्रायः॥ अग्निष्टो
मसंस्थः प्रारब्धेपि निमित्तवशादुक्थ्येनोक्थ्यसंस्थः सोमयागः कर्तव्य इ

त्यर्थः॥ उक्थ्यसंस्थे सोमे क्रतुं प्रारब्धेपि यदि तृतीयसवनांतिमोक्थ्यचमसो
न्नयनानंतरं पूतभृति सोमोतिरिक्तो भवति तदा तस्यातिरिक्तस्य सोमस्य प
योगाय निमित्तकः षोडशीयागः कार्यः॥ उक्थ्यसंस्थः प्रारब्धेपि निमित्तव
शादुक्थेन षोडशीसंस्थः कार्य इत्यर्थः॥ तत्रैवं तदेवं पूतभृतः षोडशिनं
खादिरेण चतुःस्रक्तिनोलूखलवक्त्रेणानिधेति मंत्रेण गृहीत्वा साद्य चमसानुन्नी
य मसमान्नजात इति षोडशीनमुपस्थायास्तमयसमीपे कृष्णेश्वेसमीपस्थि
तेस्तरणाभ्यां षोडशिनमुपस्थ्य उत्तरण हिरण्येः स्तोत्रोपाकरणादि पात्रप्र
क्षालनांतं षोडशीसंस्थवदनुष्ठेयं॥ तत्रापि यदि सुचमसेषून्नयमानेष्वति
रिक्तः सोम उपयुक्तो भवतीत्यभिप्रायः॥ अथ षोडशीसंस्थयज्ञे प्रारब्धे
सति यदि षोडशीनश्चमसोन्नयनानंतरं पूतभृति भाति बहुलो रात्रिप
र्यासिपर्याप्तिः॥ सोमोतिरिक्तो दृश्यते॥ तदा सषोडशीसंस्थेपि निमित्तवे व
शादुक्थेनातिरात्रसंस्थः कर्तव्यः॥ अतिरात्रश्चेत्सोमाः न सहाश्विनो द्वि
कपालः सर्वश्च यः पर्यायाश्च मसेरित्यादि आश्विनस्य पात्रे प्रक्षालनांतं कार्यं।

तत्रैव निमित्तानंतरमेव संनिपत्योपकारकेरंगैरश्विनं द्विकपालं पुरोडाशं प्राणदानोत्कत्वात्ततः यदि षोडशिना मतिरिच्येत रात्रिमुपेयुरिति श्रुते॥ रात्रिशब्देन श्रूयंतरप्रसिद्धानि द्वादशापदानानि गृह्यंते॥ तेषां एकैकं द्वाभिर्द्वाभिश्चमसैस्तथैव चयोदशीति रोन्द्रीयचमसप्रदानं संधेः स्तोत्रमाश्विनं च शास्त्रमेनामीद्भ्रुत्री रात्रिमुपेयुरितिश्रुत्यर्थः॥ अग्निष्टोमावाजपेजययोस्तु विशेषास्तु॥ स्तृतीयसवनाच्चहिष्ठोः शिपिविष्टवती षुगौरीवीतिनेत्यंत देवभवति॥ वासुदेवभट्टास्तु॥ अग्निष्टोमांते सोमातिरेके भुक्षु षोडशिनवा उक्थ्यंवा कुर्यात्॥ षोडशीन्नीत्वभिरेके वाजपेयातिरिक्तं वा अतिरात्रं वेति उक्थ्यं वा गृह्णीयोस्तत्र गतत्वाच्छब्दस्यार्थमेवमाहुः॥ तत्सर्वं निर्मूलत्वादुपेक्षणीयं॥ ॥अतिरात्रसंस्थे प्रारब्धे अश्विनार्थं चमसोनयनानंतरं यदि पूतभृति सोमः परिशिष्येत तदा तदुपयोगाय विष्ठोः शिपिविष्टवतीषु बृहत्साम कर्तव्यं॥ तत्र पितृचमसमुख्यान्दत्ताचमसा

न्नुन्नीयशास्त्रांते प्रदानं कार्यं॥ उक्थ्यशायनसोमानामिति श्रेष्ठः॥ इदं वै छंदेशिपिविष्टायेति त्यागइति विशेषः॥ एकैकस्मिन्नविस्यादभिरिक्तोसोमे तदुपयोगायथोक्तं॥ महाव्रतं कुर्वंति एष्टोपाकरणं बाणेन द्वांतं तुनेस्यादिना योदक्षिमहाव्रतं गवामयने उक्तं तात्कृत्स्नं कुर्वंति॥ एतच्च साग्निके तिरात्रे सोमातिरेके भवति॥ अन्यथा महाव्रतस्य वैगुण्यापत्तेरिति केचित्॥ अपरं तु चमसं विनापि निमित्तवशात्॥ अतिरात्रमात्रेभाश्विनचमसोन्नयनानंतरं सोमातिरेके महाव्रतं भवत्येवेत्याहुः॥ अथवातिरात्रात्सोमेतिरिक्ते अधिकारवशादतिरात्रसंस्थः प्रारब्धेपि निमित्तवशाद्योर्यामः कार्यः॥ तत्तश्वरितोन्द्रीयेभ्य ऊर्ध्वं रात्रिपर्यय उत्तमे भवति॥ ॥असोर्यामे अंत्यस्तोत्रसंबंधिचमसोन्नयनानंतरं यदि पूतभृत्तिसोमोतिरिच्येत तदा तस्यैवासोर्यामत्स्य पर्यायसेवायत्तिर्भवति॥ कर्कीयस्तु एवस्तेनक्थ्यं वा गृह्णीत्वेत्येकं मेवसूत्रे व्याख्यापउक्थ्यविग्रहणादीनां पूर्वोक्तेन प्रायश्चित्तेन समुच्चयविकल्पेन वर्णयंति तन्नो

॥११२॥

तां

पप्रयुते॥ एतदन्यकुर्युरुक्थ्यान्यंशाघ्रिश्रुतिविरोधात्॥ न्यत्त्रणयेयुरित्या
दि। स्वश्रुवपियज्ञत्वग्निष्टोममतिरिच्यते भ्यत एवोक्थ्यगृहीत्याया दिस्यत्रा
ग्निहोमादितिरिक्ते न रान्यत्किंचिदविधायैवोक्थ्यग्रहणादिविधानात्॥
तथा मानवसूत्रेपि॥ यदि तृतीयसवने विष्णोः शिपिविष्टवतीषु गौरीविते
नस्तुयुरुक्थ्यानि वातिप्रणयेयुरुक्थ्यं वा रिच्यते षोडशिनं षोडशिनं वा
तिरात्रं यद्यतिरात्राद्विष्णोः शिपिविष्टवतीषु बृहद्वा स्तुयुरित्येनेन प्रस्तुतेन
सहविकल्पस्योक्तत्वात्॥ नूनप्रारब्धसंस्थातोतिरेके संस्थांतरं वा गौरी
वीतेवान्तृतीयसवनातिरिक्ते भवतीति विकल्प एव समुच्चयः॥ वैकल्पिक
संस्थेकृतो सोमातिरेके विशेषमादोपमेधा सूत्रकारः॥ द्विसंस्थस्य
चेत्क्रतोः प्राप्तो पूर्वस्याः संस्थायाः अतिरिच्येत द्वितीयां संस्थां प्रापये
देकस्तोत्रं वोपदध्यादिति॥ अथ सर्वेषु सवनेषु सोमातिरेके पक्षांतर
मुच्यते॥ एके आचार्याः प्रवृत्तसवनावतिरिक्तस्य सोमस्योत्तरसवने सपा

॥११२॥

वनपवमाने स्तूयमाने पूतभृति पूयमानेन तत्तत्सवनसंबंधि सोमेन सह पाव
नं कुर्वंति॥ तद्यथा॥ प्रातःसवनातिरिक्तं सोमं माध्यंदिनसवनकाले माध्यं
दिने सवनसोमम ध्ये पूतभृत्येव निनयंति॥ अत्रापि प्रथमं कालाहुतिवाच
ने भवत एव॥ एवं माध्यंदिनादतिरिक्तस्य सोमस्य तृतीयसवने आर्भवे पवमा
ने स्तूयमाने पूतभृति तृतीयसवनसोममध्ये निनयं कुर्वंति तृतीयसवना
दतिरिक्तस्य सोमस्य द्रोणकलशे गृहीतस्य हारियोजनस्य ग्रहस्य मध्ये
निनीय होमः कार्यः॥ हारियोजनमध्ये वपनविस्मरणे सति तस्य तृतीयस
वनातिरिक्तसोमस्य ऋजीषकुंभमध्ये प्रक्षेपं कृत्वा तस्यातिरिक्तसोमस्य
ऋजीषमिश्रस्याप्सु प्रक्षेपः कार्यः॥ अतिरिक्तस्य सोमस्या सूत्रत्वन्यत्वेन
नातिबहुत्वेनोक्तप्रकारेणोपयोगासंभवे अन्यं पक्षः संभवेपीति के
चित्॥ सर्वत्रोनुक्तापि कालाहुतिर्भवत्येव॥ उक्तानुक्तनिमित्तेषु सोमेका
लाहुतिर्भवेदिति कारिकायां॥ सर्वत्र सोमापहारादिषु पुपरमेष्ठ्यादि
होमोप्यस्ति। कलशभेदने स्कन्नप्रायश्चित्तमधिकमिति हरिस्वामिनः॥

॥११९॥

यदि दीक्षितस्य ज्वरादिरोग उत्पद्यते ॥ तदा प्रथमदीक्षितानां मौषधानां मध्ये
येनौषधेन वैद्यश्चिकित्सितुमिच्छति तेन चिकित्सितं ॥ ज्वरादिरोगस्य प्रती
कारं कुर्यात् ॥ अत्रापि कालो हन्तिरिति संप्रदायः ॥ यदि दीक्षितस्य रोगोऽस
न्ति समये आग्नीध्रकृतं भवति अकृतं वा उभयत्रापि अध्वर्युर्यजमानपु
रुषान् प्रति आग्नीध्रमेनं नयेत ॥ इति प्रैषं ब्रूयात् ॥ ततो यजमानस्याग्नीध्रम
ध्ये वासः ॥ अकृते आग्नीध्रे आग्नीध्रस्य देशे स्थाने रोगाभिभूतो दीक्षितो
वसति रोगग्रान्तियाच्चतु ॥ यदा सुत्यायामपररात्रे आग्नीध्रो वा वेद्यां ले
वसतीध्वर्यु आनीयन्ते ॥ तदा वाभ्युक्ष्यावालगतो स्योवसतीन्वरीभ्य उद
कमादायाथ प्रजापतिर्यज्ञस्यानेन मंत्रेण ज्वराद्यभिभूतं यजमाने
सार्वर्त्विजमालभेरन् ॥ वसवस्त्वेद्रः प्रातःसवनमिति प्रातःसवने
एन आलंभमंत्रः ॥ आदित्यास्तृतीयसवनं तद्रक्षन्त्वं तद्द्रोणं गच्छमिति तृ
तीयसवने तेयजमानालंभनमंत्रः ॥ एतदालंभनं प्रमाणः सूः प्रसूहीस्थित
स्मात् प्रैषादनंतरं कार्यं ॥ यद्येवमाग्नीध्रीये कि समानोपि दीक्षितो ॥११९२॥

म्रियेत तदा तस्य मृतस्यारणिभ्यां तदानीमेवाग्निर्मथ्यते न निर्मथितेनाग्नि
ना तस्य मृतस्य दीक्षितस्य श्रौतस्मार्तविधिरहितो वा दाहः कर्तव्यः ॥ अथवा
ग्रामिचादे कंदे ग्राममग्निं गृहीत्वा तेन वध्वा तस्य मृतस्य यानेदिष्टी अतिग्रा
येन सन्निरुक्तः पुत्रो भ्राता वा कृताग्न्याधानः अकृताग्न्याधानोपि वा भवं
तितं तस्य मृतस्य प्रतिनिधिभूतं दीक्षयित्वा तेन नेदिष्ठिना मृतोपि कारार्थं
प्रवृत्तेन सह एकेभूय इतरे सत्रिणो यजेरन् ॥ सत्रं समापयेयुः ॥ अत्र मा
नवसूत्रे विशेषः ॥ यदि दीक्षितः प्रमीयेत तीर्थेनारणी हृत्वा तीर्थेन शरीरं
दक्षिणतो विहारस्य निर्मथ्येन दग्ध्वा कृष्णाजिने स्थीन्युपरह्य प्रेतनाग्नि
षु पुत्रं भ्रातरं वा दीक्षयित्वा याजयेयुरिति ॥ एतावदेतन्मेमिन्तिकां अ
त्र च नेदिष्टीयच्चपि स्वयमेसत्रफलाध्येविवक्षस्तथापि मृत पित्राद्युपि
कारसमर्थनाय वाचनिकस्यान्नप्रवृत्तिरिति यजमानसंस्कारार्थ इति र
सत्विक्यापि भवंति ॥ पानिवत्तस्य पूर्वपुरुषैः सहनामानि गृह्णीयुरिति ॥
तथा अग्नयस्तु धेमृतदीक्षितसंबंधिन एवमध्येवर्तंते न तु एवा यतु नवि

॥१२०॥ ष्टनस्तूर्गृहेषु तिष्ठंति। नित्यानि कर्माणि तेषु स्यनेष्विनः नियंतुः प्रवासग
तस्याग्रेन परा प्रवृत्तत्वाच्च न नित्यानां निवृत्तिः। पत्न्यापि मंत्रस्यैव तत्र प
त्नी कर्म करोति। न दृष्टी तु याहुमानवकर्मेति धूर्तस्वामिनः एतत्सर्वोक्तं
निर्मंथ्येन दग्धे स्यादिकं सत्र द्वादशादि महस्त्रे संवत्सरांते गणयते च
मरुत्स्तोमेन्द्राग्न कुलायाहीना देवानेकयजमानकं यज्ञेदातव्यं॥ एकया
जनके ज्योतिष्टोमादाएकाहे द्वादशाहादावहीने च दीक्षितस्य रणे दर्श
पूर्णमासास्तन्मरणांतमेव कर्म भवति न समाप्यते। तस्य तदानीमेव तत
स्मिन्नेव विहारे संदीपनं वस्त्राद्याधिम्रणादिम्नातस्मार्तविधिना दाहः का
र्यः॥ पत्नीमरणेप्येवमेव ज्ञेयं॥ एतत्सर्वोक्तं म्रियतचेन्निर्मथ्येन दग्धे स्या
दिकं मरणानंतरं यथोपदिष्टं कृत्वा ततः सुत्यादिनो समाभिषवं कृत्वा पा
त्वं तयर्मो हुत्वा ऐंद्रवायववादीनां ग्रहणात् प्राक् वेदेराग्नेयकोणे दक्षिणामु
खाः प्राचीनावीतिनेकेऊन्नातारस्तिसृषु पयस्सु पराङ्मुखीक्षनावृत्ता सुसार्प
राज्ञीषु सार्पराज्ञीनाम ब्रह्मवादिनं सर्पराजस्य स्त्रीतस्या ऋक्षु नयाद्दृष्टा

॥१२०॥

सुआयंगोः पृश्निरित्याद्यासु यामेन साम्नासु वीरनूः॥ तदुक्तं कर्मवृत्ता। अभिषुत्या
स्यस्योमंक्रतायारूपांश्च तयोर्मयोर्गृहीतेष्विनष्विंतं तु। अथवा मार्जालीये मार्जा
लसमीपे न यामेन साम्ना स्तुयुः। यामेन साम्ना स्तुते सर्वे दीक्षिताः सर्वानुरून्दक्षि
णाहस्तेन कुर्युः यंतः अस्य साम्नः स्तोत्रिया आयं गौ रित्याद्या यं जतः संतो प्रदक्षि
णं मार्जालीयं ति॥ अत्र परिगमनानंतरं होतायत्स्मिन्निवस्तोत्रं देवोऽउपविश्य प्रा
चीनावीति दक्षिणामुखः सर्पराज्ञीः शंसति। तथाच्चाश्वलायनसूत्रं॥ सार्पराज्ञी
र्होता मनगदेदरांरश्यैषा ऋक्पवमानस्य प्रथमा भवति। आहीनेषु सत्रेषु वे तन्नि
मित्तकस्मिन्नेवाहनि भवति प्रसङ्गविधानाभावात्। सत्कृत्ते नापि शास्त्रार्थ
स्य कृतत्वाच्च। अन्येष्वहः सु प्राकृतमेव कर्म सत्र समाधिपर्यंतं। ततः संवत्सरे
ष्वीति याजयेयुः। अत्र चोभयथा शास्त्रे दर्शनमिति। कदाचित्सत्रिण एवोद
वसितव्यः संवत्सरं प्रतीक्ष्य सहकारस्तस्य भूतस्योपकारयो स्थियाजनं कुर्युः॥
अथवा पित्रादेर्निर्भ सत्रफलस्योपकारायपुत्रादयो याजका इति। अस्थि
रश्वेन शरीरदाहं रिषोरभे दोपचारान्मतो लक्ष्यते तस्य कर्तृत्वासंभवे

॥१२१॥ पिवचनादधिकार इति याज्ञिकाः॥ अत्रापि सूत्रांतरे व्यवस्थायदा सहका
रिणो स्थियंते कुर्वंति तदा कर्मांत्संपवनात्संवत्सरे। अथ तु पुत्रादयस्तत्क्षम
रणात्संवत्सर इति। तथा चोपग्रंथाः सूत्रापद्य हेनं ससत्रिणं कुर्युः सत्रांतात्सं
वत्सरं गणयेयुर्यद्यनेदिष्ट आयणोनाद ध्यप्रायेणं चांतरेणो स्थियजनं च
त्रेताग्नयो दिभ रन्नयेष्वग्निहोत्रं हूयते न दर्शपूर्णमासाभ्यामिज्यते प्राणा
वा नष्टो ह्यग्निहोत्राह सोश्च दर्शपूर्णमासयोश्चेति॥ ॥निदानसूत्रे च॥
सत्रांते विनियोगादन्यूपधारणमेर्धान्निदिष्टिना तत्कर्मांतरत्वान्नाग्निहो
त्र पूर्णमासं जरामर्यत्वादिष्टयात्वग्निहोत्रं गुह्यर्थमग्ने वेशुः स्यादि तिह्युनि
वान्ये वत्सादुग्धाद्दुहुयो दभिवात्यवसायादिति येपुरो दंवद्दिति॥ ॥ तैत्तिरि
सूत्रभाष्ये॥ दीक्षितः प्रमीत इति सत्त्वायावज्जीवश्रुतेग्निहोत्रं तु मृतहोम
न्यायेन क्रियते। चरुरात्रम यमानानां लौकिक त्वश्रुतेरग्निगुह्यर्थत्वादिस्य
नुपदकारवचनात्॥ केचित्तु हूयमानान्धारयंते संवत्सरे स्थी नियोज्ययेयुरि
तिवचनान्न लौकिको भविष्यंति॥ मृतस्यपत्नी च स्थियते सर्वपत्नीकार्यं करो
॥१२१॥

तिने दिष्टीतु यजमानकार्यमिति धूर्तस्वामिनः॥ यदिष्यूपदी स्याक्षम्यभाच
त्वस्थिसंयोगादिति निदानसूत्रे॥ यद्यैकाहो भवति संस्थिते दहनमस्थीनि हरे
युर्यदि सत्रे संस्थिते संवत्सरं विहारमिधाता जुह्वातो यजमानाः समासे संव
त्सरे ज्योतिष्टोमो स्थियाजनीय इति मानवसूत्रे॥ अस्मिन्नस्थियज्ञे परिमिति
स्तोमो भवति। स्तोमपरिमाणं न कार्यं। अथवा बहिः पवमानं त्रिवृत्स्तोमेन का
र्यं। अन्यानि स्तोत्राणि समदशस्तोमेन। तां घ्रेच। सर्वेषु यजमानेषु त्रिवृत्स्तो
मः श्रूयते॥ त्रिवृतः पवमानाः स्युः सप्तदशानितर दिति। शांखायने विशेषः॥
स्तोत्रे स्तोत्रे संनिपस्थिकुंभे निदधति मार्जालीयेन क्षालियंतीति॥ अत्र म
हान्मैत्रावरुणान्तरान्तः ण्हीयात्॥ तत्र प्रथमं मैत्रावरुणं गृहीत्वाश्रयणं चव
त्वाकस्य विज्ञस्ते समर्थपश्चादेन्द्रवायवं गृहीत्वा परिमृज्या सोद्यततो मैत्रा
वरुणस्य परिमार्जनप्रभृति सादनं॥ ततः प्रभृति वछकादि ग्रहाणां ग्रहणं।
अत्रथति निधिमृतः पुत्रादि सर्वं यजमानकर्तृकं दीक्षणीयापुरुषसंस्कारे स

ग्नीवर्जं कर्म कुर्यात्॥ दीक्षणीयेष्टिः। पुरुषसंस्कारः वपनस्नानाभ्यंजनाभ्यं
जनपावनादयः। आग्निष्टोमश्च सोदेवो सोमपीदमच्छिन्नस्येत्याद्यः। अत्र
एतेषां वर्जनात्सत्रमध्ये नुदिष्टिनां प्येतत्सर्वं भवति सर्वेष्ठ मं कर्मयूपादि
स्कृतत्वात्॥ समाप्तेस्त्रियत अग्निभिः पात्रैश्चास्य पुनर्दहिः कार्ययथो
क्तः प्राक्। ततश्चतुर्थ्यां संचयनादि सर्वमौर्ध्वदेहिककर्म कार्यं। अथसा
ग्निविस्स संत्रेहीनेव दीक्षामध्ये दीक्षितमरणे विशेष उच्यते। पूर्वं हि सा
ग्निकानग्निकाहर्गणसाधारणेनाग्नी भीयादारभ्य दीक्षितमर
णेनिमित्तकमुक्तमिति शामित्रोहेति निर्देशात् ज्ञायते। ततः प्रभृति शा
मित्रस्य सद्भावाभावात्। अत्र चोस्वोचेत् बिभ्रतीति निर्देशात् साग्निविषये ह
गणे इदमुच्यत इति प्रतीति। यदि कश्चिद्दीक्षित उखा धारणं कुर्व दीक्षा
मध्य एव म्रियेत तदानम्रतं मसिपात्ररूपोपकरणसहितं संदीपनं चान्य
धिश्रयणाद्याहिताग्निविधिना दहेत्॥ यदि दीक्षितस्योपतपेत्याश्वतोऽग्नि
होत्रं जुक्संस्तयेद्यागदोभवति संसृज्येत पुनरूपेद्दयं तेयद्यम्रियते स्वे

रेवतमग्निभिर्दहं संस्थावाग्निभिरितरे यजमाना आसत इतिश्रुतेः। तेषां
च कश्चित्क्रियादतीर्थेन निहत्वा कार्येणानाहिताग्निं दहेयुररण्योरग्नीन्स
मारोप्य तु आग्नेनेन निर्हृत्य निर्मथ्येनानाहिताग्निभितिलाद्याप्नः॥
अत्र वासुदेवः। अत्र सत्रोर्थे साधारणात्तेभ्योऽग्निभ्य एकदेशमुद्धृत
स्यभागभूतमादाय तस्याग्निभिः तस्य पात्रैश्च दाहः कार्यः। एवं च
स्य गार्हपत्यस्योपत्यांतामरणिभ्यां मंथनं। नाना गार्हपत्यपक्षे तु गार्ह
पत्यः पृथग्वा आहवनीय दक्षिणाग्न्योरंशं गृह्णीयात्॥ अत्रापि पूर्व
वा कालाइति च नेस एव। ततस्तस्य मृतस्य योने दिष्टी पुत्रो भ्राता वाऽ
न्यो वा भ्रात्पुत्रादि संनिकृष्टः स्वेष्वग्निषु न खुविदंतन प्रभृति दीक्षि
तोयं ब्राह्मण इत्यं तैसर्वसान्निपातिक कर्म करोति। नचायं क्रमः। प्र
थमग्न्योः चमारोपः। उदवसानं। शालास्तंभ प्रपादानं। मंथनं। विहारः।
इष्टा दानं वा अप्सु दीक्षा हिम्रपादानां तन्नदाक्षणीयेः नवनीतेनाभ्यंज
नादि श्रपादानां तंक्र द्भेण होमो न भवति। कृष्णाजिनादानाद्युद्दान

॥१२३॥ घ्रेषांते। ततो दीक्षिता उपहव्यध्वमिति। दीक्षितान्प्रार्थयते। उपहूता इ
ति प्रत्युक्तः स्वकीयानग्नीन्गार्हपत्याहवनीयदक्षिणाग्निसंज्ञांस्त्रीणा
मग्निभिः सह संसृजेत। ततस्ते सर्वे तेन दिष्टिना सहिताः सर्वे यज्ञं समा
पयंति। यदा हि यजमानो मिथः प्रतिरुद्धितो वसंतादिकयागकाले च व
र्षान्तरादिप्रतीक्षणेनात्मानमभिक्रांतमन्यमान्यस्त्वधिकारप्रवृत्त्या वृक
क्षिमन्दे चेगिरिनद्यादिव्यवधानं विना यागार्थं सोममेकस्मिन्काले
युतुनस्तदा समेत्य सवनात्संसव इत्युच्यते। स चोभयथा संभवंति। कदा
चिदद्वयोर्यजमानयोरेवं विध योर्जातं तोरेवं कालातिक्रमरक्षणार्थं स
हदाय ज्ञारंभो भवति। कदाचित्परस्परं यज्ञारंभजानतोरपि स्पुसारं भा
स्त्रागेवसहार ज्ञानं भवति तदेदं वक्ष्यमाणं नैमित्तिकं कार्यं। अ
त्वायनो पिसंसवप्रध्यार्थं महाज्ञान विषये विहितपानयोः स्वस्परं दोः संसं
निसंस्पस्यपइत्याचक्षत इति। तत्र समाने जनपदे एकस्मिन्नेव देशे येस्मि
न्नेव देशा पाणदानै एव विधिः संसवो भवति तदा अर्द्धरात्रे प्रातरनुवा

॥१२३॥

दकमुपाकुर्यादितरयजमानापेक्षया पूर्वः पूर्वः शीघ्रं सर्वं कर्म प्रवर्त
येत्। कारयेत्। अहर्गणेष्वहरपि संसवे सति नास्य नैमित्तिकस्याव्यत्तिः
किंतु देवादीक्तेभ्यः स्वार्थस्यादिस्पक्रम्य कृत्वा दावेवमानिरिति॥ ॥

२स

तथाभूतिः शीघ्रं कर्म कुर्वद्भिरपि पुसमिद्ध एवासौ होमः कार्यः॥ नत्वरावत्ता
तथाभूनिः शीघ्रं कर्म कुर्वद्भिरपि पुसमिद्ध एवासौ होमः कार्यः॥ नत्वरावत्ता
सुसमिद्धः॥ तथा इतरयोगापेक्षया कीयपत्ते इत्संस्थो नर संस्थाधिकां कु
र्यात्॥ इष्टं प्रारब्धमेव संस्थं संस्थाधिक्यकरणं चैवं। यदीतरेणाग्निहोम
प्रारब्धो भवति। तर्हि स्वयं तमग्निष्टोमसंस्थं कुर्यात्। यदि सोतरेणाग्नि

स८

ष्टोमं स्तर्हि व्यसंस्थं। यदीतरेणोक्थ्यः प्रारब्धस्तर्हि संस्थं षोडशिसंस्थं कु
र्यात्॥ यदि षोडशिसंस्थ इतरेणारब्धस्तदा स्वयं यज्ञमतिरात्रमतिरात्रं सं
स्थं कुर्यात्॥ तथा च तांड्ये। यदितरो ग्निष्टोमः स्यात् उक्थ्यः कार्यः पक्थ्
क्थ्यो तिरात्रो यो वै भूयान्यज्ञक्रतुः स इंद्रस्य प्रियो भवतीति तथापक्षा
न्तरमपि तन्त्रेव। अथोरवल्वाहुर्दुःप्रायइव वै परः पंथायमेवाग्नेयत्तत्के

तुमारभेत तस्मान्नेयादिति। तथा च मानवे। यदि समानेजनयदे विहिषाण
योः सुत्याः संतिवपेसुर्यच्चग्निष्टोमः परस्तोक्थ्यं कुर्यादूक्थ्यश्चेत् षोडशिनं
यदि षोडश्यतिरात्रं यद्यतिरात्रो द्विश्वजितमन्निजिनं वा सर्वस्तोमं कुर्यादि
ति। शांखायनेन च विशेषः। पूर्वेषु संस्थापयेत्सु तरां संस्थां कुर्वीतेत अति
रात्रं कुर्वाणेषु द्विरात्रं द्विरात्रं कुर्वाणेषु त्रिरात्रं। तस्यां वा संस्थायां भूयसी
दक्षिणां दद्यादिति। अत्र तस्यैवान्हो भ्यासेन द्विरात्रकरणं विशेषानुपदे
शात्। तदा चान्यः सोमः कर्तव्यो हरं नत्वात्। तच्च तु क्रयणाद्यायनादीनि
सांनिपातिकानि कार्याणि सहोत्राण्यकृतत्वात्। सोमस्यैव केवलस्य प्रणय
ने। एवं यावदर्थं कर्म मेवाचाहरणधर्मो भवति। निमित्ते सति कर्मानन्तरत्वा
त्। समिष्टयजुरंतं च पूर्वं पूर्वमहरंगत्वात्। अत्र संसवसोमे वृषण्वतीवृष
न्शब्दयुक्तापवस्वदो वृषासुतइति इयं प्रातः सवने प्रतिपत्। पवमानस्य
प्रथमो वृग्भवति। अथवा सर्वेषु सवनेषु एवं प्रथमानां प्रथमा वृक्

वृषण्वती भवति। वृहद्रथंतरे पृष्ठः। उभे वृहद्रथंतरे कार्ये इति ताण्डेभ्य व
णात्। उभयोरपि नियोगः। कल्पकारेणोक्तः। पवमाने रथंतरस्य वृहतश्च
होत्रृषाम्नीति। तुरश्रवानाम रुक्षिवृहष्टिः। तेन कृष्टे समानीतो रश्रवसे तेभ
वे संसवसोमे माध्यंदिनपवमाने त्रयो ज्या एको आचार्यः। आभीकमभिध
नमाभाभीशावान्निवेसामानि माध्यंदिने पवमाने आवपति तथा प्रातः स
वनांते संवेशायोपवेशायेति मंत्रेण संगृहीतमाज्यमध्वर्युराहवनी
ये जुहोति। माध्यंदिनसवनांते संवेशायोपवेशाय त्रिष्टुभे छंदसे भि
भूत्यै स्वाहेति तथैव जुहोति। तृतीयसवनांते संवेशायोपवेशाय जगत्यै
छंदसोभिभूत्यै स्वाहेति तथैव जुहोति। तथा मंत्रवर्णस्यागः। प्रातःस
वनइति स समीनिर्देशात् आद्यागं तु स्यादिति प्रशास्ता प्रमुहीत्यस्मात्प्रागाहुति
होमः। इति वासुदेवः। तथा विहवीयं सजनीयकयाभ्यु भीयसंज्ञानि सू
क्तानि यथाविहितं होता शंसति। विहवशब्देति। सन्नस्तीति विहवीयं स
मानेषु र्च इति। ● सजनइति शब्दो स्मिन्नस्तीति सजनीयं। योजात

एवं प्रथमो मनस्वानिति। कथा शब्द इति शब्दोऽस्मिन् सूक्ते न कया
शुभीयं। कयापा शुभा सवयसः समीला इति। तथा चूडाशारखायनः॥ कया
शुभीयं मरुत्वतीयं। शंसनीयो निष्केवल्यं विहव्यो वैश्वदेव्यमिति॥
तथा साख्यमरणमिच्छन्तः प्रजापत्यवर्जिं जुहुयुः॥ सखा सखा सदृशः॥ सदृश
स्य सखा परकीयोऽध्वर्युरध्वर्योः। सखा होता होतुः उद्गातोद्गातुः॥ ब्र
ह्मा ब्रह्मणः। यजमानो यजमानस्येस ऋत्विसंबंधिसाख्या अध्वर्युहोत्र
द्गात्र ब्रह्मगृहपतयः साख्यमरणं परकीयं यथ तस्याध्वर्योदेः स
ख्युः सदृशस्य मरणं ज्ञात्वा तथा रथान्तरा। एवं प्रदेशमन्तारथोगप्रेति
सरन्तः॥ तस्मिन्नथान्तो अन्तरास्थेन गंतुं शाक्य पूर्वदेशोयन्तुयोर्व्यवधाय
केसंसवनिमित्तं न भवतीत्यर्थः॥ तथापरस्परं येषां द्वेषो न भवति। ए
तेन परस्परं स्नेहवतां बहुनामपि सह यज्ञं कुर्वतां मेव नैमित्तिकं भव
ति। आरस्मिन् द्वेषं कुर्वाणे पि स्वयं द्वेषमेकुर्वतीन्व संसवनिमित्तं न भ
वतिरित्येधादिव्येव धानं विनापि। नैमित्तिरीश्चेच। एकस्मिन्नपि देशे

राज्ञो भेदे शे संसवो नकः॥ तदपि समानस्य एकस्य जनपदः समानजन
पद इति विषयप्रायर्थं व्याख्यानं तत्राल भ्यते। शारखायने विशेषः॥ स्व वं
सोयान् विहरन्ति वायुराकाशश्चेति। स्ववंस्य आपो नदीतडादिस्थाः संसवं
विहरन्ति विंदति। तथा वासुराकाशाश्चेति सूत्रार्थः॥ ॥अथ सोमदाह
प्रायश्चित्तमभिधीयते॥ सोमस्य दाहे जाते अध्वर्यादयो यथास्य वृत्ति
स्य तत्तत्स्यत्तैकर्मणा तान्धारयेयुः॥ मया एतत्सक्षाधीतं मदीयं कर्म
रतं रक्षेवं वित्तेह हृदं धारणं कुर्युः॥ तथा चतां धे। यदि सोममभिदाहेज्जुहा
नध्वर्युः स्यात्रायेस्तोत्राण्युद्गाता शास्त्राणि होता पेयं यथा पूर्वं यज्ञेन चरे
युरिति॥ ततः सोमापहरणवदर्जुनादिकं प्रतिनिधित्वं संपाद्याभिषुत्य
स्तावशिष्टं यज्ञं समापयेयुः॥ अस्मिन्प्रयोगे हिरण्यवासोऽश्वहिताः पंच
गा दत्वा तं यज्ञमवभृथांतं कृत्वा ततः प्रभृति द्वादश्यपात्रैः शाकृस एव यज्ञः
पुनः कार्यः॥ तत्र पुनर्यज्ञे नर्यज्ञेत दद्यात्॥ यस्तु वृस्मिन्पक्षे दक्षिणात्वेन दा
स्यां तस्यात्॥ अत्र ढके विशेषः॥ सोमे दग्धे सोमाग्गिधाय यथाह्निविषु पुनः स

॥१२८॥ स्कारणं सोऽस्य हनि सोमे दग्धे कृतां तानुज्ञात्वा गृह्णानध्वर्युः स्यान्नाय स्तोत्रा
ण्युपाकृतानि शस्त्राणि होतारो यथापूर्वं यज्ञेन वरेयुः पंचैव वरान्दद्यात्तेषु दक्षिणा क
र्मस्याचार्या उत्तरस्मिन्पक्षे यजेतिरौगाक्षिस्तत्र ता दक्षिणा दद्याच्छ्राः पूर्वस्मि
न्न्यास्य भवतीति नीतासु वेदूरानेव दद्यात् । ग्राक सोऽस्या सोमे दग्धे पंचैव व
रान्दद्यात्तत्र पुनर्यज्ञो हगणे सोमे दग्धे पंचैव वरान्दद्या केदेवस्माद्दे संपद्य
दन्तरेणाहवनीं सोमे दग्धे पंचैव वरान्दद्यात्रात्रैकस्माद्दे संसद्ये दि ति । भान
वे यदि राजाभिदह्येत गृह्णानध्वर्युः स्यान्नाय स्तोत्राण्युपाकृतानि शस्त्राणि होता
थ यज्ञं संभरस्यानुपूर्वं विष्टेरन्यच्च दक्षिणा ददाति संस्थाप्य येन कामयेत
तेन पुनर्यजेत तत्र यत्कामयेत तद्दद्याद्यद्दक्षिणास्तदास्यं स्यान्न स्यादध्व
र्यवे वरं दद्यात्पुराहाद्दक्षा क्षितते एवेन सत्विजो याजयेयुरिति । अत्र ग
दाधरः ॥ अन्नेष्वाद्य मेध्यपानदुष्टं सोम मप्सु भस्म निवापः क्षिप्याध्वर्यवे वरं
दानस्मिन्नेव विहारे सुन्ताकृपं सोमं द्रव्यं सां[illegible] निपातिकां गे संस्चस्य यागः

॥१२८॥

[OrderDescription]
,CREATED=22.07.19 15:02
,TRANSFERRED=2019/07/22 at 15:26:44
,PAGES=86
,TYPE=STD
,NAME=S0001072
,Book Name=M-1975-KATYAYANSUTRAPADHATI
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF

FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF

FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
,FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,